रामायणकथासंदोहः

OR

READINGS FROM THE RÂMÂYANA

(AYODHY[illegible]ḌA.)

BY

M. P. OKA & G. K. MODAK,

Sanskrit Teachers, New English School,

POONA.

Sole Agents :-

Messrs. G. Ramchandra & Co.,

Book-Sellers and Publishers,

Budhwar Peth, Poona City.

1915.

Price Annas $4\frac{1}{2}$.

1. The maximum time allowed for retention of a book shall be one fortnight. It may be borrowed again if not required by others.

2. No reference books shall be lent out.

3. No borrower shall have more than two volumes out of the Library at one time.

4. Borrowers must not pass books from one to another but must return them to the Librarian.

5. Library books must not be used as class-books.

6. Any one who defaces by writing or otherwise damages any book shall pay the full cost of the book or of the entire works, if it consists of more than one volume.

7. The borrower shall be responsible for the value of the books lent out to him if they are lost, damaged or otherwise cannot be returned to the Library when they are due or recalled.

8. The presence of the voucher with the Librarian shall be considered sufficient proof of the non-return of books.

1615-36 The Bangalore Press

रामायणकथासंदोहः

OR

READINGS FROM THE RÂMÂYAṆA

(AYODHYÂKÂṆḌA.)

BY

M. P. OKA & G. K. MODAK,
Sanskrit Teachers, New English School, Poona.

POONA.

Printed at the Arya-Bhushana Press.

1915.

Price Annas 4½.

Printed at the 'Aryabhushan' Press, Poona, by
NATESH APPAJI DRAVID and published at Poona
by MAHADEO PANDURANG OKA, and GOVIND
KRISHNA MODAK, Teachers,
New English School, Poona.

INTRODUCTION.

A great writer has remarked "there is a class of books which are mostly admired but rarely read." The great Indian Epics the Râmâyana and the Mahâbhârata may fairly be said to fall under this class. They are mines of priceless jewels, but it requires great labour and patience to reach them owing to the immense length of these immortal works. Ordinary students of Sanskrit are thus debarred from enjoying at first hand the beauties that these immortal works largely abound in. Mr. C. V. Vaidya has published epitomes of these Epics in the very words of the authors. His object, however, has been to give the stories in a connected form. It has naturally not been possible for him, from the limited space at his disposal, to make room in the abridged editions for the numberless excellent passages bearing on a variety of subjects. Messrs. Oka and Modak, Sanskrit teachers, New English School, Poona, have undertaken the very laborious but at the same time very laudable work of carefully going through these works and publishing, for the edification and amusement of the student of Sanskrit, choicest passages on a variety of subjects descriptive, social, moral and religious. The Râmâyaṇa is admittedly superior to the Mahâbhârata from a didactic point of view, and Messrs. Oka and Modak have taken up the Râmâyṇa first. They propose to publish redaings or extracts from the different parts or Kâṇḍas separately and they have taken up the अयोध्याकाण्ड first.

These extracts, from their simple and lucid style, and from the very interesting character of their subjects will, I am sure, be of immese help to boys and girls in High Schools in understanding the genius of the language, and will pave their way to understand the more difficult but at the same time very beautiful works of classical poets— Kâlidâsa and others. A student of Standard VI., with a Sanskrit glossary at his elbow

will have little difficulty in understanding these extracts. I feel great satisfaction in noting that Messrs. Oka and Modak have studiously abstained from giving translations and elaborate explanatory notes. There can be no worse enemies of students in schools and colleges than the latter day annotators, who out of purely monetary considerations give translations and voluminous notes and thus do permanent harm to the students for whose benefit their works are intended. For the time being they forget that in their endeavour to cure the disease they kill the patient.

The University has done well in introducing these Epics in its curricula. Selections like the present deserve to be appointed in High Schools and Vernacular Training Colleges as companion reading books.

The present volume contains 37 extracts comprising about 700 श्लोकs. The price is annas 4½ and hence the book is quite within reach of the means of even poor students.

Poona,
23rd March 1915.

N. S. Panse.

CONTENTS.

Anomalous forms occurring in the text with their proper substitutes.

Page.	Stanza.	Form	Substitute.
२	५	नियोक्तास्मि	नियोक्ताहे
	१	युवराजानं	युवराजम्
५	८	मृगयामि	मृगये
६	१६	प्रतिगृह्णन्तीं	प्रतिगृह्णतीं
९	२०	अर्हसे	अर्हसि
१०	३	अप्रजा	अप्रजाः
	२७	शुश्रूषेत्	शुश्रूषेत
१२	२३	शुचः	शोर्चीः
१५	९	स्वपिष्ये	स्वप्स्यामि
	१८	प्रार्थयानस्य	प्रार्थयमानस्य
१७	१८	नयिष्यसे	नेष्यसे
	२०	आचरस्व	आचर
१९	१९	पर्यशुष्यत	पर्यशुष्यत्
	२१	स्वयंभोः	स्वयंभुवः
२१	१६	सपत्न्यः	सपत्नीकाः
२२	२०	रुदन्तः	रुदन्तौ
		समवेशयन्	समवेशयताम्
	२६	गच्छस्व	गच्छ
२३	९	जिज्ञासामि	जिज्ञासे
२५	१६	दुर्मेधे	दुर्मेधः
२६	९	आमन्त्रयामि	आमन्त्रये
२७	२	द्रक्ष्याम	द्रक्ष्यामः
३०	१९	पश्यामहे	पश्यामः
३२	३	द्रक्ष्यसे	द्रक्ष्यसि
३४	१	सज्जमानया	सज्यमानया
३६	१६	विमृशमानानां	विमृशन्तीनाम्
	१७	अर्हसे	अर्हसि

Page.	Stanza.	Form.	Substitute.
३७	२३	नाशयते	नाशयति
	८	सीदतेतराम्	सीदतितराम्
४१	१४	आनयिष्यामि	आनेष्यामि
४४	१०	गृहीतधनुषौ	गृहीतधन्वानौ
४६	६	परिमार्गते	परिमार्गति
४८	१७	पतिना	पत्या
४९	४	समाचरे	समाचरामि
	११	प्रवेक्ष्ये	प्रवेक्ष्यामि
५०	४	सज्जेत	सज्येत
	६	सज्जन्ते	सज्यन्ते
५१	५	चेतयानः	चेतयमानः
५५	१५	वर्तव्यम्	वर्तितव्यम्

N. B.—**These anomalous forms are marked by asterisks in the following pages.**

Correction :—Read तमोऽन्वितः for the last word of the **first half of Stanza** 10, **page** 52.

रामायणकथासंदोहः ।

अयोध्याकाण्डम् ।

१ रामगुणानुवादः ।

स हि देवैरुदीर्णस्य रावणस्य वधार्थिभिः ।
अर्थितो मानुषे लोके जज्ञे विष्णुः सनातनः ॥ १ ॥
स हि रूपोपपन्नश्च वीर्यवाननसूयकः ।
निभृतः संवृताकारो गुप्तमन्त्रः सहायवान् ।
अमोघक्रोधहर्षश्च त्यागसंयमकालवित् ॥ २ ॥
कुलोचितमतिः क्षात्रं स्वधर्मं बहु मन्यते ।
मन्यते परया प्रीत्या महत्स्वर्गफलं ततः ॥ ३ ॥
कदाचिदुपकारेण कृतेनैकेन तुष्यति ।
न स्मरत्यपकाराणां शतमप्यात्मवत्तया ।
नावज्ञेयश्च भूतानां न च कालवशानुगः ॥ ४ ॥
धनुर्वेदविदां श्रेष्ठो लोकेऽतिरथसंमतः ।
आरोहे विनये चैव युक्तो वारणवाजिनाम् ॥ ५ ॥
अभियाता प्रहर्ता च सेनानयविशारदः ।
अप्रधृष्यश्च संग्रामे क्रुद्धैरपि सुरासुरैः ॥ ६ ॥
उत्तरोत्तरयुक्तीनां वक्ता वाचस्पतिर्यथा ।
लोके पुरुषसारज्ञः साधुरेको विनिर्मितः ॥ ७ ॥
एवं श्रेष्ठैर्गुणैर्युक्तः प्रजानां पार्थिवात्मजः ।
बहिश्चर इव प्राणो बभूव गुणतः प्रियः ॥ ८ ॥

(सर्गः १)

२ रामाभिषेकाय राजकृतं प्रजानुमतप्रार्थनम् ।

दशरथः– विदितं भवतामेतद्यथा मे राज्यमुत्तमम् ।
पूर्वकैर्मम राजेन्द्रैः सुतवत्परिपालितम् ॥ १ ॥
मयाप्याचरितं पूर्वैः पन्थानमनुगच्छता ।
प्रजा नित्यमनिद्रेण यथाशक्त्यभिरक्षिताः ॥ २ ॥
इदं शरीरं कृत्स्नस्य लोकस्य चरता हितम् ।
पाण्डुरस्यातपत्रस्य च्छायायां जरितं मया ॥ ३ ॥
सोऽहं विश्राममिच्छामि पुत्रं कृत्वा प्रजाहिते ।
संनिकृष्टानिमान्सर्वाननुमान्य द्विजर्षभान् ॥ ४ ॥
अनुजातो हि मां सर्वैर्गुणैः श्रेष्ठो ममात्मजः ।
पुरंदरसमो वीर्ये रामः परपुरंजयः ।
यौवराज्ये नियोक्तास्मि* प्रातः पुरुषपुंगवम् ॥ ५ ॥
अनुरूपः स वो नाथो लक्ष्मीवाँल्लक्ष्मणाग्रजः ।
त्रैलोक्यमपि नाथेन येन स्यान्नाथवत्तरम् ॥ ६ ॥
यदिदं मेऽनुरूपार्थं मया साधु सुमन्त्रितम् ।
भवन्तो मेऽनुमन्यन्तां कथं वा करवाण्यहम् ॥ ७ ॥ इति ॥
ब्राह्मणा बलमुख्याश्च पौरजानपदैः सह ।
ऊचुश्च मनसा ज्ञात्वा वृद्धं दशरथं नृपम् ॥ ८ ॥
इच्छामो हि महाबाहुं रामं छत्रवृताननम् ।
बहवो नृप कल्याणगुणाः सन्ति सुतस्य ते ॥ ९ ॥

(सर्गः २)

---

३ यौवराज्याभिषेकसंकल्पनिवेदनम् ।

दशरथः– राम वृद्धोऽस्मि दीर्घायुर्भुक्ता भोगा यथेप्सिताः ।
अद्य प्रकृतयः सर्वास्त्वामिच्छन्ति नराधिपम् ।
अतस्त्वां *युवराजानमभिषेक्ष्यामि पुत्रक ॥ १ ॥

सुहृदश्चाप्रमत्तास्त्वां रक्षन्त्वद्य समन्ततः ।
भवन्ति बहुविघ्नानि कार्याण्येवंविधानि हि ॥ २ ॥
विप्रोषितश्च भरतो यावदेव पुरादितः ।
तावदेवाभिषेकस्ते प्राप्तकालो मतो मम ॥ ३ ॥
कामं खलु सतां वृत्ते भ्राता ते भरतः स्थितः ।
किं तु चित्तं मनुष्याणामनित्यमिति मे मतम् ।
सतां च धर्मनित्यानां कृतशोभि च राघव ॥ ४ ॥
इत्युक्तः सोऽप्यनुज्ञातः श्वोभाविन्यभिषेचने ।
तत्क्षणादेव निष्क्रम्य मातुरन्तःपुरं ययौ ॥ ५ ॥
उवाच वचनं रामो हर्षयंस्तामिदं वरम् ।
भविता श्वोऽभिषेको मे यथा मे शासनं पितुः ॥ ६ ॥
एतच्छ्रुत्वा तु कौसल्या चिरकालाभिकाङ्क्षितम् ।
हर्षबाष्पाकुलं वाक्यमिदं राममभाषत ॥ ७ ॥
वत्स राम चिरं जीव हतास्ते परिपन्थिनः ।
ज्ञातीन्मे त्वं श्रिया युक्तः सुमित्रायाश्च नन्दय ॥ ८ ॥
कल्याणे बत नक्षत्रे मया जातोऽसि पुत्रक ।
यत इक्ष्वाकुराज्यश्रीः पुत्र त्वां संश्रयिष्यति ॥ ९ ॥

(सर्गः ४)

---

४ मन्थराकृतं कैकेयीप्रोत्साहनम् ।

ज्ञातिदासी यतो नित्यं कैकेय्या तु सहोषिता ।
शयानामेव कैकेयीमिदं वचनमब्रवीत् ॥ १ ॥
उत्तिष्ठ मूढे किं शेषे भयं त्वामभिवर्तते ।
उपप्लुतमघौघेन नात्मानमवबुध्यसे ॥ २ ॥
नराधिपकुले जाता महिषी त्वं महीपतेः ।
उग्रत्वं राजधर्माणां कथं देवि न बुध्यसे ॥ ३ ॥

उपस्थितः प्रयुञ्जानस्त्वयि सान्त्वमनर्थकम् ।
अर्थेनैवाद्य ते भर्ता कौसल्यां योजयिष्यति ॥ ४ ॥
अपवाह्य तु दुष्टात्मा भरतं तव बन्धुषु ।
भरतादेव रामस्य राज्यसाधारणाद्भयम् ॥ ५ ॥
पापेनानृतसान्त्वेन बाले नित्यं सुखोचिता ।
रामं स्थापयता राज्ये सानुबन्धा हता ह्यसि ॥ ६ ॥

कैकेयी– इदं तु मन्थरे मह्यमाख्यातं परमं प्रियम् ।
रामो राजसुतो ज्येष्ठो यौवराज्यमतोऽर्हति ।
कौसल्यातोऽतिरिक्तं च मम शुश्रूषते बहु ॥ ७ ॥
राज्यं यदि हि रामस्य भरतस्यापि तत्तदा ।
मन्यते हि यथात्मानं तथा भ्रातॄंस्तु राघवः ॥ ८ ॥

मन्थरा– हर्षं किमर्थमस्थाने कृतवत्यसि बालिशे ।
शोचामि दुर्मतित्वं ते का हि प्राज्ञाभिनन्दति ।
अरेः सपत्नीपुत्रस्य वृद्धिं मृत्योरिवागताम् ॥ ९ ॥
उपस्थास्यसि कौसल्यां दासीवत्त्वं कृताञ्जलिः ।
पुत्रश्च तव रामस्य प्रेष्यत्वं हि गमिष्यति ॥ १० ॥
भविता राघवो राजा राघवस्य च यः सुतः ।
राजवंशात्तु भरतः कैकेयि परिहास्यते ॥ ११ ॥
ध्रुवं तु भरतं रामः प्राप्य राज्यमकण्टकम् ।
देशान्तरं गमयिता लोकान्तरमथापि वा ॥ १२ ॥
दर्पान्निराकृता पूर्वं त्वया सौभाग्यवत्तया ।
राममाता सपत्नी ते कथं वैरं न यापयेत् ॥ १३ ॥

कैकेयी– कथयस्व ममोपायं केनोपायेन मन्थरे ।
भरतः प्राप्नुयाद्राज्यं न तु रामः कथंचन ॥ १४ ॥

मन्थरा– पुरा देवासुरे युद्धे पतिस्ते रक्षितस्त्वया ।
तुष्टेन तेन दत्तौ ते द्वौ वरौ शुभदर्शने ॥ १५ ॥
तौ च याचस्व भर्तारं भरतस्याभिषेचनम् ।

प्रव्राजनं च रामस्य वर्षाणि च चतुर्दश ।
अन्तर्बहिश्च पुत्रस्ते कृतमूलो भविष्यति ॥ १६ ॥
क्रोधागारं प्रविश्याद्य क्रुद्धेवाश्वपतेः सुते ।
शेष्वानन्तर्हितायां त्वं भूमौ मलिनवासिनी ।
तव प्रियार्थं राजा तु प्राणानपि परित्यजेत् ॥ १७ ॥

(सर्गाः ७, ८, ९).

---

५ कैकेय्या निर्घृणं वरप्रार्थनम् ।

स वृद्धस्तरुणीं भार्यां प्राणेभ्योऽपि गरीयसीम् ।
अपापः पापसंकल्पां ददर्श धरणीतले ॥ १ ॥

दशरथः– न तेऽहमभिजानामि क्रोधमात्मनि संश्रितम् ।
देवि केनाभियुक्तासि केन वासि विमानिता ॥ २ ॥
अवध्यो वध्यतां को वा वध्यः को वा विमुच्यताम् ।
दरिद्रः को भवेदाढ्यो द्रव्यवान्वाप्यकिंचनः ॥ ३ ॥

कैकेयी– नास्मि विप्रकृता देव केनचिन्नावमानिता ।
अभिप्रायस्तु मे कश्चित्तमिच्छामि त्वया कृतम् ।
प्रतिज्ञां प्रतिजानीष्व यदि त्वं कर्तुमिच्छसि ॥ ४ ॥

दशरथः– अवलिप्ते न जानासि त्वत्तः प्रियतरो मम ।
मनुजो मनुजव्याघ्राद्रामादन्यो न विद्यते ॥ ५ ॥
यं मुहूर्तमपश्यंस्तु न जीवेयमहं ध्रुवम् ।
तेन रामेण कैकेयि शपे ते वचनाक्रियाम् ॥ ६ ॥

कैकेयी– सत्यसंधो महातेजा धर्मज्ञः सत्यवाक्शुचिः ।
वरं मम ददात्येष सर्वे शृण्वन्तु दैवताः ॥ ७ ॥
स्मर राजन्पुरावृत्तं तस्मिन्देवासुरे रणे ।
तौ दत्तौ च वरौ देव निक्षेपौ * मृगयाम्यहम् ॥ ८ ॥

नव पञ्च च वर्षाणि दण्डकारण्यमाश्रितः ।
चीराजिनधरो धीरो रामो भवतु तापसः ।
भरतो भजतामद्य यौवराज्यमकण्टकम् ॥ ९ ॥

स राजराजो भव सत्यसंगरः कुलं च शीलं च हि जन्म रक्ष च ।
परत्रवासे हि वदन्त्यनुत्तमं तपोधनाः सत्यवचो हितं नृणाम् ॥ १० ॥

दशरथः–नृशंसे दुष्टचारित्रे कुलस्यास्य विनाशिनि ।
किं कृतं तव रामेण पापे पापं मयापि वा ।
सदा ते जननीतुल्यां वृत्तिं वहति राघवः ॥ ११ ॥
त्वं मयात्मविनाशाय भवनं स्वं निवेशिता ।
अविज्ञानान्नृपसुता व्याला तीक्ष्णविषा यथा ॥ १२ ॥
जीवलोको यदा सर्वो रामस्याह गुणस्तवम् ।
अपराधं कमुद्दिश्य त्यक्ष्यामीष्टमहं सुतम् ॥ १३ ॥
सान्त्वयन्सर्वभूतानि रामः शुद्धेन चेतसा ।
गृह्णाति मनुजव्याघ्रः प्रियैर्विषयवासिनः ॥ १४ ॥
तिष्ठेल्लोको विना सूर्यं सस्यं वा सलिलं विना ।
न तु रामं विना देहे तिष्ठेत्तु मम जीवितम् ।
अपि ते चरणौ मूर्ध्ना स्पृशाम्येष प्रसीद मे ॥ १५ ॥

कैकेयी– समयं मानृतं कार्षीः पूर्ववृत्तमनुस्मरन् ।
एकाहमपि पश्येयं यद्यहं राममातरम् ।
अञ्जलिं प्रतिगृह्णन्तीं* श्रेयो ननु मृतिर्मम ॥ १६ ॥

दशरथः– अनर्थमिममर्थाभं केन त्वमुपदेशिता ।
शीलव्यसनमेतत्ते नाभिजानाम्यहं पुरा ॥ १७ ॥
तां तु मे सुकृतां बुद्धिं सुहृद्भिः सह निश्चिताम् ।
कथं द्रक्ष्याम्यपावृत्तां परैरिव हतां चमूम् ॥ १८ ॥
किं मां वक्ष्यान्ति राजानो नानादिग्भ्यः समागताः ।
बालिशो बत कामात्मा राजा दशरथो भृशम् ।
स्त्रीकृते यः प्रियं पुत्रं वनं प्रस्थापयिष्यति ॥ १९ ॥

परिप्रक्ष्यन्ति काकुत्स्थं वक्ष्यामीह कथं तदा ।
कैकेय्या क्लिश्यमानेन पुत्रः प्रव्राजितो मया ।
यदि सत्यं ब्रवीम्येतत्तदसत्यं भविष्यति ॥ २० ॥
यदा यदा च कौसल्या स्नेहेन समुपस्थिता ।
न मया सत्कृता देवी सत्कारार्हा कृते तव ।
इदानीं तत्तपति मां यन्मया सुकृतं त्वयि ॥ २१ ॥
आम्रं छित्त्वा कुठारेण निम्बं परिचिरेत्तु यः ।
अप्येनं पयसा सिञ्चेन्नैवास्य मधुरो भवेत् ॥ २२ ॥
न हि राममहं दृष्ट्वा प्रवसन्तं महावने ।
चिरं जीवितुमाशंसे रुदतीं चापि मैथिलीम् ॥ २३ ॥
वैदेही बत मे प्राणाञ्शोचन्ती क्षपयिष्यति ।
ततस्त्वं विधवा राज्यं सपुत्रा कारयिष्यसि ॥ २४ ॥
नालं द्वितीयं वचनं पुत्रो मां प्रति भाषितुम् ।
स वनं प्रव्रजेत्युक्तो बाढमित्येव वक्ष्यति ॥ २५ ॥
यदि मे राघवः कुर्याद्वनं गच्छेति चोदितः ।
प्रतिकूलं प्रियं मे स्यान्न तु रामः करिष्यति ॥ २६ ॥
प्रियं चेद्भरतस्यैतद्रामप्रव्राजनं भवेत् ।
मा स्म मे भरतः कार्षीत्प्रेतकृत्यं गतायुषः ॥ २७ ॥
कथं रथैर्विभुर्यात्वा गजाश्वैश्च मुहुर्मुहुः ।
पद्भ्यां रामो महारण्ये वत्सो मे विचरिष्यति ॥ २८॥
यस्य चाहारसमये सूदाः कुण्डलधारिणः ।
अहंपूर्वाः पचन्ति स्म प्रसन्नाः पानभोजनम् ॥ २९ ॥
स कथं नु कषायाणि तिक्तानि कटुकानि च ।
भक्षयन्वन्यमाहारं सुतो मे वर्तयिष्यति ॥ ३० ॥
महार्हवस्त्रसंबद्धो भूत्वा चिरसुखोचितः ।
काषायपरिधानस्तु कथं रामो भविष्यति ॥ ३१ ॥

नृशंसवृत्ते व्यसनप्रहारिणि प्रसह्य वाक्यं यदिहाद्य भाषसे ।
न नाम ते तेन मुखात्पतत्यधो विशीर्यमाणा रसना सहस्रधा ॥ ३२ ॥
अपुत्रेण मया पुत्रः श्रमेण महता महान् ।
रामो लब्धो महातेजाः स कथं त्यज्यते मया ॥ ३३ ॥
(स० १०…१३.)

---

६ पितृप्रियस्य रामस्य प्रवासाङ्गीकारः ।

ततः प्रभातां रजनीमुदिते च दिवाकरे ।
सुमन्त्रः प्राञ्जलिर्भूत्वा तुष्टाव जगतीपतिम् ॥ १ ॥

सुमन्त्रः—अयं वसिष्ठो भगवान्ब्राह्मणैः सह तिष्ठति ।
क्षिप्रमाज्ञाप्यतां राजन्राघवस्याभिषेचनम् ॥ २ ॥ इति
यदा वक्तुं स्वयं दैन्यान्न शशाक महीपतिः ।
तदा सुमन्त्रं मन्त्रज्ञा कैकेयी प्रत्युवाच ह ॥ ३ ॥
सुमन्त्र राजा रजनीं रामहर्षसमुत्सुकः ।
प्रजागरपरिश्रान्तो निद्रावशमुपागतः ।
राममानय भद्रं ते नात्र कार्या विचारणा ॥ ४ ॥

सुमन्त्रः—अश्रुत्वा राजवचनं कथं गच्छामि भामिनि ।

दशरथः—सुमन्त्र रामं द्रक्ष्यामि शीघ्रमानय सुन्दरम् ॥ ५ ॥ इति
स मन्यमानः कल्याणं हृदयेन ननन्द च ।
राजपुत्रमुवाचेदं सुमन्त्रो राजसत्कृतः ।
कौसल्या सुप्रजा राम पिता त्वां द्रष्टुमिच्छति ॥ ६ ॥
एवमुक्तस्तु संहृष्टो नरसिंहो महाद्युतिः ।
निकेतान्निर्ययौ श्रीमान्महाभ्रादिव चन्द्रमाः ॥ ७ ॥

पौर्यः— नूनं नन्दति ते माता कौसल्या मातृनन्दन ।
पश्यन्ती सिद्धयात्रं त्वां पित्र्यं राज्यमुपस्थितम् ॥ ८ ॥
सर्वसीमन्तिनीनां च सीता सीमान्तिनी वरा ।
एवं हि ता अमन्यन्त रामस्य हृदयप्रियाम् ॥ ९ ॥

तया सुचरितं देव्या पुरा नूनं महत्तपः ।
रोहिणीव शशाङ्केन रामसंयोगमाप या ॥ १० ॥
इति प्रासादशृङ्गेषु प्रमदाभिर्नरोत्तमः ।
शुश्राव राजमार्गस्थः प्रिया वाच उदाहृताः ॥ ११ ॥
स राजकुलमासाद्य महेन्द्रसदनोपमम् ।
राजपुत्रः पितुर्वेश्म प्रविवेश श्रिया ज्वलन् ॥ १२ ॥
स ददर्शासने रामो विषण्णं पितरं शुभे ।
उपप्लुतमिवादित्यमुक्तानृतमृषिं यथा ॥ १३ ॥
चिन्तयामास किं राजा न मां प्रत्यभिनन्दति ।
कैकेयीमाभिवाद्यैव रामो वचनमब्रवीत् ॥ १४ ॥
कच्चिन्मया नापराद्धमज्ञानाद्येन मे पिता ।
कुपितस्तन्ममाचक्ष्व त्वमेवैनं प्रसादय ।
मुहूर्तमपि नेच्छेयं जीवितुं कुपिते नृपे ॥ १५ ॥
कच्चिन्नो परुषं किंचिदभिमानात्पिता मम ।
उक्तो भवत्या रोषेण येनास्य लुलितं मनः ॥ १६ ॥

कैकेयी– एष मह्यं वरं दत्त्वा पुरा मामभिपूज्य च ।
स पश्चात्तप्यते राजा यथान्यः प्राकृतस्तथा ॥ १७ ॥
धर्मस्य मूलं गदितं विदितं च सतामपि।
तत्सत्यं न त्यजेद्राजा कुपितस्त्वत्कृते यथा ॥ १८ ॥
यदि त्वभिहितं राज्ञा त्वयि तन्न विपत्स्यते ।
ततोऽहमभिधास्यामि न ह्येष त्वयि वक्ष्यति ॥ १९ ॥

रामः– अहो धिङ् नार्हसे * देवि वक्तुं मामीदृशं वचः ।
अहं हि वचनाद्राज्ञः पतेयमपि पावके ।
करिष्ये प्रतिजाने च रामो द्विर्नाभिभाषते ॥ २० ॥

कैकेयी– पुरा देवासुरे युद्धे पित्रा ते मम राघव ।
रक्षितेन वरौ दत्तौ सशल्येन महारणे ॥ २१ ॥

तत्र मे याचितो राजा भरतस्याभिषेचनम् ।
गमनं दण्डकारण्ये तव चाद्यैव राघव ॥ २२ ॥
इतीव तस्यां परुषं वदन्त्यां न चैव रामः प्रविवेश शोकम् ।
प्रविव्यथे चापि महानुभावो राजा च पुत्रव्यसनाभितप्तः ॥ २३ ॥

रामः– एवमस्तु गमिष्यामि वनं वस्तुमहं त्वितः ।
न ह्यतो धर्मचरणं किंचिदस्ति महत्तरम् ।
यथा पितरि शुश्रूषा तस्य वा वचनाक्रिया ॥ २४ ॥

कैकेयी– एवं भवतु यास्यन्ति दूताः शीघ्रजवैर्हयैः ।
भरतं मातुलकुलादिहावर्तयितुं नराः ।
तव त्वहं क्षमं मन्ये नोत्सुकस्य विलम्बनम् ॥ २५ ॥

रामः– यावन्मातरमापृच्छे सीतां चानुनयाम्यहम् ।
ततोऽद्यैव गमिष्यामि दण्डकानां महद्वनम् ॥ २६ ॥
भरतः पालयेद्राज्यं *शुश्रूषेच्च पितुर्यथा ।
तथा भवत्या कर्तव्यं स हि धर्मः सनातनः ॥ २७ ॥ इति
वन्दित्वा चरणौ राज्ञो विसंज्ञस्य पितुस्तदा ।
कैकेय्याश्चाप्यनार्याया निष्पपात महाद्युतिः ॥ २८ ॥

(स० १४, १८, १९.)

रामस्य वनवासविरोधिभ्यां कौसल्यालक्ष्मणाभ्यां संवादः ।

मातुः समीपं धर्मात्मा प्रविवेश महायशाः ।
प्रस्थितो दण्डकारण्यमाप्रष्टुमुपचक्रमे ॥ १ ॥
सा राघवमुपासीनमसुखार्ता सुखोचिता ।
उवाच पुरुषव्याघ्रमुपशृण्वति लक्ष्मणे ॥ २ ॥
यदि पुत्र न जायेथा मम शोकाय राघव ।
न स्म दुःखमतो भूयः पश्येयमहमप्रजाः ।
*अप्रजास्मीति संतापो न ह्यन्यः पुत्र विद्यते ॥ ३ ॥

अत्यन्तं निगृहीतास्मि भर्तुर्नित्यमसंमता ।
परिवारेण कैकेय्याः समा वाप्यथ वावरा ॥ ४ ॥
दश सप्त च वर्षाणि जातस्य तव राघव ।
अतीतानि प्रकाङ्क्षन्त्या मया दुःखपरिक्षयम् ॥ ५ ॥
तदक्षयं महद्दुःखं नोत्सहे सहितुं चिरात् ।
विप्रकारं सपत्नीनामेवं जीर्णापि राघव ॥ ६ ॥
उपवासैश्च योगैश्च बहुभिश्च परिश्रमैः ।
दुःखसंवर्धितो मोघं त्वं हि दुर्गतया मया ।
स्थिरं नु हृदयं मन्ये ममेदं यन्न दीर्यते ॥ ७ ॥
ममैव नूनं मरणं न विद्यते न चावकाशोऽस्ति यमक्षये मम ।
यदन्तकोऽद्यैव न मां जिहीर्षति प्रसह्य सिंहो रुदतीं मृगीमिव ॥ ८ ॥
अथापि किं जीवितमद्य मे वृथा त्वया विना चन्द्रनिभाननप्रभ ।
अनुव्रजिष्याम वनं त्वयैव गौः सुदुर्बला वत्समिवाभिकाङ्क्षया ॥ ९ ॥
लक्ष्मणः—न रोचते ममाप्येतदार्ये यद्राघवो वनम् ।
त्यक्त्वा राज्यश्रियं गच्छेत्स्त्रिया वाक्यवशंगतः ॥ १० ॥
विप्रतीपश्च वृद्धश्च विषयैश्च प्रधर्षितः ।
नृपः किमिव न ब्रूयाच्चोद्यमानः समन्मथः ॥ ११ ॥
देवकल्पमृजुं दान्तं रिपूणामपि वत्सलम् ।
अवेक्षमाणः को धर्मं त्यजेत्पुत्रमकारणात् ॥ १२ ॥
तदिदं वचनं राज्ञः पुनर्बाल्यमुपेयुषः ।
पुत्रः को हृदये कुर्याद्राजवृत्तमनुस्मरन् ॥ १३ ॥
(रामं प्रति) यावदेव न जानाति कश्चिदर्थमिमं नरः ।
तावदार्य मया सार्धमात्मस्थं कुरु शासनम् ॥ १४ ॥
निर्मनुष्यामिमां सर्वामयोध्यां मनुजर्षभ ।
करिष्यामि शरैस्तीक्ष्णैर्यदि स्थास्यति विप्रिये ॥ १५ ॥
भरतस्याथ पक्ष्यो वा यो वास्य हितमिच्छति ।
सर्वांस्तांश्च वधिष्यामि मृदुर्हि परिभूयते ॥ १६ ॥

प्रतीपश्चेत्पिता कामं बध्यतां वध्यतामपि ।
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथं प्रतिपन्नस्य कार्यं भवति शासनम् ॥ १७ ॥
(कौसल्यां प्रति) अनुरक्तोस्मि भावेन भ्रातरं देवि तत्त्वतः ।
दीप्तमग्निमरण्यं वा यदि रामः प्रवेक्ष्यति ।
प्रविष्टं तत्र मां देवि त्वं पूर्वमवधारय ॥ १८ ॥
कौसल्या–यथैव राजा पूज्यस्ते गौरवेण तथाप्यहम् ।
त्वां साहं नानुजानामि न गन्तव्यमितो वनम् ॥ १९ ॥
त्वद्वियोगान्न मे कार्यं जीवितेन सुखेन च ।
त्वया सह मम श्रेयस्तृणानामपि भक्षणम् ॥ २० ॥
यदि त्वं यास्यसि वनं त्यक्त्वा मां शोकलालसाम् ।
अहं प्रायमिहासिष्ये न च शक्ष्यामि जीवितुम् ॥ २१ ॥
रामः– अनुमन्यस्व मां देवि गामिष्यन्तमितो वनम् ।
त्वया मया च वैदेह्या लक्ष्मणेन सुमित्रया ।
पितुर्नियोगे स्थातव्यमेष धर्मः सनातनः ॥ २२ ॥
शोकः संधार्यतां मातर्हृदये साधु मा* शुचः ।
वनवासादिहैष्यामि पुनः कृत्वा पितुर्वचः ॥ २३ ॥
(लक्ष्मणं प्रति) न तेन शक्नोमि पितुः प्रतिज्ञामिमां न कर्तुं सफलां यथावत्
स ह्यावयोस्तात गुरुर्नियोगे देव्याश्च भर्ता स गतिश्च धर्मः॥२४।

(स० १९, २०, २१.)

---

८ रामलक्ष्मणोक्तो दैवपौरुषप्रभावः ।

आसाद्य रामः सौमित्रिं सुहृदं भ्रातरं प्रियम् ।
उवाचेदं स धैर्येण धारयन्सत्त्वमात्मवान् ॥ १ ॥
निगृह्य रोषं शोकं च धैर्यमाक्रम्य केवलम् ।
माता नः सा यथा न स्यात्सविशङ्का तथा कुरु ।
परलोकभयाद्भीतो निर्भयोऽस्तु पिता मम ॥ २ ॥

मम प्रव्राजनादद्य कृतकृत्या नृपात्मजा ।
सुतं भरतमव्यग्रमभिषेचयतां ततः ॥ ३ ॥
कृतान्त एव सौमित्रे द्रष्टव्यो मत्प्रवासने ।
कैकेय्याः प्रतिपत्तिर्हि कथं स्यान्मम वेदने ।
यदि तस्या न भावोऽयं कृतान्तविहितो भवेत् ॥ ४ ॥
जानासि हि यथा सौम्य न मातृषु ममान्तरम् ।
भूतपूर्वं विशेषो वा तस्या मयि सुतेऽपि वा ॥ ५ ॥
कश्च दैवेन सौमित्रे योद्धुमुत्सहते पुमान् ।
यस्य नु ग्रहणं किंचित्कर्मणोऽन्यन्न दृश्यते ॥ ६ ॥
ऋषयोऽप्युग्रतपसो दैवेनाभिप्रचोदिताः ।
उत्सृज्य नियमांस्तीव्रान्भ्रश्यन्ते काममन्युभिः ॥ ७ ॥
असंकल्पितमेवेह यदकस्मात्प्रवर्तते ।
निवार्यारब्धमारम्भैर्ननु दैवस्य कर्म तत् ॥ ८ ॥
व्याहतेऽप्यभिषेके मे परितापो न विद्यते ।
मा च लक्ष्मण संतापं कार्षीर्लक्ष्म्या विपर्यये ॥ ९ ॥

लक्ष्मणः—किं नाम कृपणं दैवमशक्तमभिशंससि ।
कथं त्वं कर्मणा शक्तः कैकेयीवशवर्तिनः ।
करिष्यसि पितुर्वाक्यमधर्मिष्ठं विगर्हितम् ॥ १० ॥
यद्यपि प्रतिपत्तिस्ते दैवी चापि तयोर्मतम् ।
तथाप्युपेक्षणीयं ते न मे तदभिरोचते ॥ ११ ॥
विक्लवो वीर्यहीनो यः स दैवमनुवर्तते ।
वीराः संभावितात्मानो न दैवं पर्युपासते ॥ १२ ॥
दैवं पुरुषकारेण यः समर्थः प्रबाधितुम् ।
न दैवेन विपन्नार्थः पुरुषः सोऽवसीदति ॥ १३ ॥
द्रक्ष्यन्ति त्वद्य दैवस्य पौरुषं पुरुषस्य च ।
दैवमानुषयोरद्य व्यक्ता व्यक्तिर्भविष्यति ॥ १४ ॥

अत्यङ्कुशमिवोद्दामं गजं मदबलोद्धतम्।
प्रधावितमहं दैवं पौरुषेण निवर्तये ॥ १५ ॥
न शोभार्थाविमौ बाहू न धनुर्भूषणाय मे ।
नासिराबन्धनार्थाय न शराः स्तम्भहेतवः ।
अमित्रमथनार्थाय सर्वमेतच्चतुष्टयम् ॥ १६ ॥
यैर्विवासस्त्वयारण्ये मिथो राजन्समर्थितः ।
अरण्ये ते विवत्स्यन्ति चतुर्दश समास्तथा ॥ १७ ॥
अद्य मेऽस्त्रप्रभावस्य प्रभावः प्रभविष्यति ।
राज्ञश्चाप्रभुतां कर्तुं प्रभुत्वं च तव प्रभो ॥ १८ ॥
अद्य चन्दनसारस्य केयूरामोक्षणस्य च ।
वसूनां च विमोक्षस्य सुहृदां पालनस्य च ।
अनुरूपमिमौ बाहू राम कर्म करिष्यतः ॥ १९ ॥ इति
विमृज्य बाष्पं परिसान्त्व्य चासकृत्स लक्ष्मणं राघववंशवर्धनः ।
उवाच पित्रोर्वचने व्यवस्थितं निबोध मामेष हि सौम्य सत्पथः ॥२०॥
(स० २२,२३.)

---

९ प्रवत्स्यतो रामस्य मातुरनुज्ञाप्राप्तिः ।

कौसल्या– अदृष्टदुःखो धर्मात्मा सर्वभूतप्रियंवदः ।
मयि जातो दशरथात्कथमुञ्छेन वर्तयेत् ॥ १ ॥
यस्य भृत्याश्च दासाश्च मृष्टान्यन्नानि भुञ्जते ।
कथं स भोक्ष्यते रामो वने मूलफलान्ययम् ॥ २ ॥
कथं हि धेनुः स्वं वत्सं गच्छन्तमनुगच्छति ।
अहं त्वानुगमिष्यामि यत्र वत्सो गमिष्यसि ॥ ३ ॥

रामः– कैकेय्या वञ्चितो राजा मयि चारण्यमाश्रिते ।
भवत्या च परित्यक्तो न नूनं वर्तयिष्यति ॥ ४ ॥
भर्तुः पुनः परित्यागो नृशंसः केवलं स्त्रियाः ।
स भवत्या न कर्तव्यो मनसापि विगर्हितः ॥ ५ ॥

यावज्जीवति काकुत्स्थः पिता मे जगतीपतिः ।
शुश्रूषा क्रियतां तावत्स हि धर्मः सनातनः ॥ ६ ॥
भर्तुः शुश्रूषया नारी लभते स्वर्गमुत्तमम् ।
अपि या निर्नमस्कारा निवृत्ता देवपूजनात् ॥ ७ ॥
कौसल्या– गमने सुकृतां बुद्धिं न ते शक्नोमि पुत्रक ।
विनिवर्तयितुं वीर नूनं कालो दुरत्ययः ॥ ८ ॥
गच्छ पुत्र त्वमेकाग्रो भद्रं तेऽस्तु सदा विभो ।
पुनस्त्वयि निवृत्ते तु कृतार्थे चरितव्रते ।
पितुरानृण्यतां प्राप्ते स्वपिष्ये* परमं सुखम् ॥ ९ ॥
गच्छेदानीं महाबाहो क्षेमेण पुनरागतः ।
वध्वाश्च मम नित्यं त्वं कामान्संवर्धयेह भोः ॥ १० ॥
यं पालयसि धर्मं त्वं प्रीत्या च नियमेन च ।
स वै राघवशार्दूल धर्मस्त्वामभिरक्षतु ॥ ११ ॥
यानि दत्तानि तेऽस्त्राणि विश्वामित्रेण धीमता ।
तानि त्वामभिरक्षन्तु गुणैः समुदितं सदा ॥ १२ ॥
पितृशुश्रूषया पुत्र मातृशुश्रूषया तथा ।
सत्येन च महाबाहो चिरं जीवाभिरक्षितः ॥ १३ ॥
लोकपालाश्च ते सर्वे वासवप्रमुखास्तथा ।
श्रुतिः स्मृतिश्च धर्मश्च पान्तु त्वां पुत्र सर्वतः ॥ १४ ॥
महावनेऽपि चरतो मुनिवेषस्य धीमतः ।
तथा देवाश्च दैत्याश्च भवन्तु सुखदाः सदा ॥ १५ ॥
महाद्विपाश्च सिंहाश्च व्याघ्रा ऋक्षाश्च दंष्ट्रिणः ।
महिषाः शृङ्गिणो रौद्रा न ते द्रुह्यन्तु पुत्रक ॥ १६ ॥
आगमास्ते शिवाः सन्तु सिध्यन्तु च पराक्रमाः ।
सर्वसंपत्तयो राम स्वस्तिमान्गच्छ पुत्रक ॥ १७ ॥
यन्मङ्गलं सुपर्णस्य विनताकल्पयत्पुरा ।
अमृतं प्रार्थयानस्य तत्ते भवतु मङ्गलम् ॥ १८ ॥ इति

आनम्य मूर्ध्नि चाघ्राय परिष्वज्य यशस्विनी ।
अवदत्पुत्रमिष्टार्थं गच्छ राम यथासुखम् ॥ १९ ॥
मयार्चिता देवगणाः शिवादयो महर्षयो भूतगणाः सुरोरगाः ।
अभिप्रयातस्य वनं चिराय ते हितानि काङ्क्षन्तु दिशश्च राघव॥२०॥
(स० २४, २५.)

१० सतीधर्माख्यानपुरःसरं सीताया वनगमनप्रार्थनम्, रामकृतं तदभिनन्दनं च ।

(I

वैदेही चापि तत्सर्वं न शुश्राव तपस्विनी ।
तदेव हृदि तस्याश्च यौवराज्याभिषेचनम् ।
प्रविवेशाथ रामस्तु ह्रिया किंचिदवाङ्मुखः ॥ १ ॥
अथ सीता समुत्पत्य वेपमाना च तं पतिम् ।
आह दुःखाभिसंतप्ता किमिदानीमिदं प्रभो ॥ २ ॥
न ते शतशलाकेन जलफेननिभेन च ।
आवृतं वदनं वल्गु च्छत्त्रेणाभिविराजते ॥ ३ ॥
रामः—सीते तत्रभवांस्तातः प्रव्राजयति मां वनम् ।
कुले महति संभूते धर्मज्ञे धर्मचारिणि ॥ ४ ॥
राज्ञा सत्यप्रतिज्ञेन पित्रा दशरथेन वै ।
कैकेय्यै मम मात्रे तु पुरा दत्तौ महावरौ ॥ ५ ॥
तयाद्य मम सज्जेऽस्मिन्नभिषेके नृपोद्यते ।
प्रचोदितः स समयो धर्मेण प्रतिनिर्जितः ॥ ६ ॥
चतुर्दश हि वर्षाणि वस्तव्यं दण्डके मया ।
पित्रा मे भरतश्चापि यौवराज्ये नियोजितः ।
सोऽहं त्वामागतो द्रष्टुं प्रस्थितो विजनं वनम् ॥ ७ ॥
भरतस्य समीपे ते नाहं कत्थ्यः कदाचन ।
ऋद्धियुक्ता हि पुरुषा न सहन्ते परस्तवम् ॥ ८ ॥

कल्यमुत्थाय देवानां कृत्वा पूजां यथाविधि ।
वन्दितव्यो दशरथः पिता मम जनेश्वरः ।
माता च मम कौसल्या वृद्धा संतापकर्शिता ॥ ९ ॥
विप्रियं न च कर्तव्यं भरतस्य कदाचन ।
स हि राजा च वैदेहि देशस्य च कुलस्य च ॥ १० ॥
एवमुक्ता तु वैदेही प्रियार्हा प्रियवादिनी ।
प्रणयादेव संक्रुद्धा भर्तारमिदमब्रवीत् ।
किमिदं भाषसे राम वाक्यं लघुतया ध्रुवम् ॥ ११ ॥
आर्यपुत्र पिता माता भ्राता पुत्रस्तथा स्नुषा ।
स्वानि पुण्यानि भुञ्जानाः स्वं स्वं भाग्यमुपासते ॥ १२ ॥
भर्तृभाग्यं तु नार्येका प्राप्नोति पुरुषर्षभ ।
अतश्चैवाहमादिष्टा वने वस्तव्यमित्यपि ॥ १३ ॥
न पिता नात्मजो वात्मा न माता न सखीजनः ।
इह प्रेत्य च नारीणां पतिरेको गतिः सदा ॥ १४ ॥
अनुशिष्टास्मि मात्रा च पित्रा च विविधाश्रयम् ।
नास्मि संप्रति वक्तव्या वर्तितव्यं यथा मया ॥ १५ ॥
सुखं वने निवत्स्यामि यथैव भवने पितुः ।
आचिन्तयन्ती त्रींल्लोकांश्चिन्तयन्ती पतिव्रतम् ॥ १६ ॥
यदि त्वं प्रस्थितो दुर्गं वनमद्यैव राघव ।
अग्रतस्ते गमिष्यामि मृद्नती कुशकण्टकान् ॥ १७ ॥
अथ मामेवमव्यग्रां वनं नैव * नयिष्यसे ।
विषमद्यैव पास्यामि मा वशं द्विषतां गमम् ॥ १८ ॥
स एवं ब्रुवतीं सीतां बाष्पदूषितलोचनाम् ।
निवर्तनार्थे धर्मात्मा वाक्यमेतदुवाच ह ॥ १९ ॥
इहाचरस्व * धर्मं त्वं यथा मे मनसः सुखम् ।
वने दोषा हि बहवो वसतस्तान्निबोध मे ॥ २० ॥

सग्राहाः सरितश्चैव पङ्कवत्यस्तु दुस्तराः ।
निरपाश्च सुदुःखाश्च मार्गा दुःखमतो वनम् ॥ २१ ॥
सुप्यते पर्णशय्यासु श्रमखिन्नेन रात्रिषु ।
अहोरात्रं च संतोषः कर्तव्यो नियतात्मना ॥ २२ ॥
फलैर्वृक्षावपतितैः सीते दुःखमतो वनम् ।
तदलं ते वनं गत्वा क्षेमं न हि वनं तव ॥ २३ ॥
(स० २६,२७,२८.)

II

एतत्तु वचनं श्रुत्वा सीता रामस्य दुःखिता ।
प्रसक्ताश्रुमुखी मन्दमिदं वचनमब्रवीत् ॥ १ ॥
ये त्वया कीर्तिता दोषा वने वस्तव्यतां प्रति ।
गुणा इत्येव तान्विद्धि तव स्नेहपुरस्कृता ॥ २ ॥
न हि मां त्वत्समीपस्थां स्वयं शक्रोऽपि राघव ।
सुराणामीश्वरः शक्तः प्रधर्षयितुमोजसा ॥ ३ ॥
कुशकाशशरेषीका ये च कण्टकिनो द्रुमाः ।
तुलाजिनसमस्पर्शा मार्गे मम सह त्वया ॥ ४ ॥
पत्रं मूलं फलं यत्तु अल्पं वा यदि वा बहु ।
दास्यसे स्वयमाहृत्य तन्मेऽमृतरसोपमम् ॥ ५ ॥
यदि मां दुःखितामेवं वनं नेतुं न चेच्छसि ।
विषमग्निं जलं वाहमास्थास्ये मृत्युकारणात् ॥ ६ ॥ इति
सान्त्व्यमाना तु रामेण मैथिली जनकात्मजा ।
प्रणयाच्चाभिमानाच्च परिचिक्षेप राघवम् ॥ ७ ॥
किं त्वामन्यत वैदेहो पिता मे मिथिलाधिपः ।
राम जामातरं प्राप्य स्त्रियं पुरुषविग्रहम् ॥ ८ ॥
किं हि कृत्वा विषण्णस्त्वं कुतो वा भयमस्ति ते ।
यत्परित्यक्तुकामस्त्वं मामनन्यपरायणाम् ॥ ९ ॥

द्युमत्सेनसुतं वीरं सत्यवन्तमनुव्रताम् ।
सावित्रीमेव मां विद्धि त्वमात्मवशवर्तिनीम् ॥ १० ॥
यस्य पथ्यं च रामात्थ यस्य चार्थेऽवरुध्यसे ।
त्वं तस्य भव वश्यश्च विधेयश्च सदानघ ॥ ११ ॥
त्वया च सह गन्तव्यं मया गुरुजनाज्ञया ।
प्रेत्यभावेऽपि कल्याणः संगमो मे सदा त्वया ॥ १२ ॥
श्रुतिर्हि श्रूयते पुण्या ब्राह्मणानां यशस्विनाम् ।
इहलोके च पितृभिर्या स्त्री यस्य महाबल ।
अद्भिर्दत्ता स्वधर्मेण प्रेत्यभावेऽपि तस्य सा ॥ १३ ॥
मत्कृते न च ते शोको न भविष्यामि दुर्भरा ।
फलमूलाशना नित्यं भविष्यामि न संशयः ॥ १४ ॥
महावातसमुद्धूतं यन्मामवकरिष्यति ।
रजो रमण तन्मन्ये परार्ध्यमिव चन्दनम् ॥ १५ ॥
न मातुर्न पितुस्तत्र स्मरिष्यामि न वेश्मनः ।
यस्त्वया सह स स्वर्गो निरयो यस्त्वया विना १६ ॥
अनन्यभावामनुरक्तचेतसं त्वया वियुक्तां मरणाय निश्चिताम् ।
नयस्व मां साधु कुरुष्व याचनां नातो मया ते गुरुता भविष्यति ॥१७॥
इति सा शोकसंतप्ता विलप्य करुणं बहु ।
चुक्रोश पतिमायस्ता भृशमालिङ्ग्य सस्वरम् ॥ १८ ॥
तत्सितामलचन्द्राभं मुखमायतलोचनम् ।
* पर्यशुष्यत बाष्पेण जलोद्धृतमिवाम्बुजम् ॥ १९ ॥
तां परिष्वज्य बाहुभ्यां विसंज्ञामिव दुःखिताम् ।
उवाच वचनं रामः परिविश्वासयंस्तदा ॥ २० ॥
न देवि तव दुःखेन स्वर्गमप्यभिरोचये ।
न हि मेऽस्ति भयं किंचित्स्वयंभोरिव * सर्वतः ॥२१ ॥
तव सर्वमभिप्रायमविज्ञाय शुभानने ।
वासं न रोचयेऽरण्ये शक्तिमानपि रक्षणे ॥ २२ ॥

सर्वथा सदृशं सीते मम स्वस्य कुलस्य च ।
व्यवसायमनुक्रान्ता कान्ते त्वमतिशोभनम् ॥ २३ ॥
आरभस्व शुभाचारे वनवासक्षमाः क्रियाः ।
नेदानीं त्वदृते सीते स्वर्गोऽपि मम रोचते ॥ २४ ॥

(स०२९,३०.)

---

११ अनुमतलक्ष्मणागमनस्य रामस्य पितुरनुज्ञाप्रार्थनम् ।

लक्ष्मणः– (रामं प्रति) यदि गन्तुं कृता बुद्धिर्वनं मृगगजायुतम् ।
अहं त्वानु गमिष्यामि वनमग्रे धनुर्धरः ।
तत्र सर्वं करिष्यामि जाग्रतः स्वपतश्च ते ॥ १ ॥
न देवलोकाक्रमणं नामरत्वमहं वृणे ।
ऐश्वर्यं चापि लोकानां कामये न त्वया विना ॥ २ ॥

रामः– मयाद्य सह सौमित्रे त्वयि गच्छति तद्वनम् ।
को भरिष्यति कौसल्यां सुमित्रां वा यशस्विनीम् ॥ ३ ॥
सा हि राज्यमिदं प्राप्य नृपस्याश्वपतेः सुता ।
दुःखितानां सपत्नीनां न करिष्यति शोभनम् ॥ ४ ॥

लक्ष्मणः– तवैव तेजसा वीर भरतः पूजयिष्यति ।
कौसल्यां च सुमित्रां च प्रयतो नास्ति संशयः ॥ ५ ॥
कौसल्या बिभृयादार्या सहस्रं मद्विधानपि ।
यस्याः सहस्रं ग्रामाणां संप्राप्तमुपजीविनाम् ॥ ६ ॥
धनुरादाय सगुणं खनित्रपिटकाधरः ।
आहरिष्यामि ते नित्यं मूलानि च फलानि च ॥ ७ ॥

रामः– व्रजापृच्छस्व सौमित्रे सर्वमेव सुहृज्जनम् ।
सर्वमायुधमादाय क्षिप्रमाव्रज लक्ष्मण ॥ ८ ॥

ये च राज्ञो ददौ दिव्ये महात्मा वरुणः स्वयम् ।
जनकस्य महायज्ञे धनुषी रौद्रदर्शने ॥ ९ ॥
अभेद्ये कवचे दिव्ये तूणी चाक्षय्यसायकौ ।
आदित्यविमलाभौ द्वौ खड्गौ हेमपरिष्कृतौ ।
सत्कृत्य निहितं सर्वमेतदाचार्यसद्मनि ॥ १० ॥
जग्मतुः पितरं द्रष्टुं सीतया सह राघवौ ।
पदातिं सानुजं दृष्ट्वा ससीतं च जनास्तदा ।
ऊचुर्बहुजना वाचः शोकोपहतचेतसः ॥ ११ ॥
यं यान्तमनुयाति स्म चतुरङ्गबलं महत् ।
तमेकं सीतया सार्धमनुव्रजति लक्ष्मणः ॥ १२ ॥
या न शक्या पुरा द्रष्टुं भूतैराकाशगैरपि ।
तामद्य सीतां पश्यन्ति राजमार्गगता जनाः ॥ १३ ॥
अद्य नूनं दशरथः सत्त्वमाविश्य भाषते ।
निर्गुणस्यापि पुत्रस्य कथं स्याद्विनिवासनम् ।
किं पुनर्यस्य लोकोऽयं जितो वृत्तेन केवलम् ॥ १४ ॥
तस्मात्तस्योपघातेन प्रजाः परमपीडिताः ।
औदकानीव सत्त्वानि ग्रीष्मे सलिलसंक्षयात् ॥ १५ ॥
ते लक्ष्मण इव क्षिप्रं *सपत्न्यः सहबान्धवाः ।
गच्छन्तमनुगच्छामो येन गच्छति राघवः ॥ १६ ॥
राघवेण वने सर्वे वयं वत्स्याम निर्वृताः ।
अस्मत्त्यक्तानि वेश्मानि कैकेयी प्रतिपद्यताम् ॥ १७ ॥
वनं नगरमेवास्तु येन गच्छति राघवः ।
अस्माभिश्च परित्यक्तं पुरं संपद्यतां वनम् ॥ १८ ॥ इति
सोऽभिदुद्राव वेगेन रामं दृष्ट्वा विशांपतिः ।
तमसंप्राप्य दुःखार्तः पपात भुवि मूर्च्छितः ॥ १९ ॥

तं परिष्वज्य बाहुभ्यां तावुभौ रामलक्ष्मणौ ।
पर्यङ्के सीतया सार्धं रुदन्तः *समवेशयन् ॥ २० ॥
अथ रामो मुहूर्तस्य लब्धसंज्ञं महीपतिम् ।
उवाच प्राञ्जलिर्बाष्पशोकार्णवपरिप्लुतम् ॥ २१ ॥
आपृच्छे त्वां महाराज सर्वेषामीश्वरोऽसि नः ।
प्रस्थितं दण्डकारण्यं पश्य त्वं कुशलेन माम् ।
लक्ष्मणं चानुजानीहि सीता चान्वेतु मां वनम् ॥ २२ ॥

राजा– अहं राघव कैकेय्या वरदानेन मोहितः ।
अयोध्यायां त्वमेवाद्य भव राजा निगृह्य माम् ॥ २३ ॥

रामः– नव पञ्च च वर्षाणि वनवासे विहृत्य ते ।
पुनः पादौ ग्रहीष्यामि प्रतिज्ञान्ते नराधिप ॥ २४ ॥ **इति**
रुदन्नार्तः प्रियं पुत्रं सत्यपाशेन संयतः ।
कैकेय्या चोद्यमानस्तु मिथो राजा तमब्रवीत् ॥ २५ ॥
श्रेयसे वृद्धये तात पुनरागमनाय च ।
*गच्छस्वारिष्टमव्यग्रः पन्थानमकुतोभयम् ॥ २६ ॥

रामः– पिता हि दैवतं तात देवतानामपि स्मृतम् ।
तस्माद्दैवतमित्येव करिष्यामि पितुर्वचः ॥ २७ ॥

मया विसृष्टां भरतो महीमिमां सशैलखण्डां सपुरोपकाननाम् ।
शिवासु सीमास्वनुशास्तु केवलं त्वया यदुक्तं नृपते तथास्तु तत् ॥ २८ ॥
फलानि मूलानि च भक्षयन्वने गिरींश्च पश्यन्सरितः सरांसि च ।
वनं प्रविश्यैव विचित्रपादपं सुखी भविष्यामि तवास्तु निर्वृतिः ॥ २९ ॥
(स० ३१, ३३, ३४.)

---

१२ सुमन्त्रक्रोधः ।

पाणिं पाणौ विनिष्पिष्य दन्तान्कटकटाय्य च ।
कोपाभिभूतः सहसा सुमन्त्रः प्रत्यभाषत ॥ १ ॥

न ह्यकार्यतमं किंचित्तव देवीह विद्यते ।
पतिघ्नीं त्वामहं मन्ये कुलघ्नीमपि चान्ततः ॥ २ ॥
मावमंस्था दशरथं भर्तारं वरदं पतिम् ।
भर्तुरिच्छा हि नारीणां पुत्रकोट्या विशिष्यते ॥ ३ ॥
यथावयो हि राज्यानि प्राप्नुवन्ति नृपक्षये ।
इक्ष्वाकुकुलनाथेऽस्मिंस्तं लोपयितुमिच्छसि ॥ ४ ॥
राजा भवतु ते पुत्रो भरतः शास्तु मेदिनीम् ।
वयं तत्र गमिष्यामो यत्र रामो गमिष्यति ॥ ५ ॥
आभिजात्यं हि ते मन्ये यथा मातुस्तथैव च ।
न हि निम्बात्स्रवेत्क्षौद्रं लोके निगदितं वचः ॥ ६ ॥
पितुस्ते वरदः कश्चिद्ददौ वरमनुत्तमम् ।
सर्वभूतरुतं तस्मात्संजज्ञे वसुधाधिपः ॥ ७ ॥
ततो जृम्भस्य शयने विरुताद्भूरिवर्चसः ।
पितुस्ते विदितो भावः स तत्र बहुधाहसत् ॥ ८ ॥
ततस्ते जननी क्रुद्धा *जिज्ञासामीति चाब्रवीत् ।
नृपश्चोवाच तां देवीं हासं शंसामि ते यदि ।
ततो मे मरणं सद्यो भविष्यति न संशयः ॥ ९ ॥ इति
माता ते पितरं देवी पुनः केकयमब्रवीत् ।
शंस मे जीव वा मा वा न मां त्वं प्रहासिष्यसि ॥ १० ॥ इति
प्रियया च तथोक्तः स केकयः पृथिवीपतिः ।
मातरं ते निरस्याशु विजहार यथासुखम् ॥ ११ ॥
सत्यश्चात्र प्रवादोऽयं लौकिकः प्रतिभाति मे ।
पितॄन्समनुजायन्ते नरा मातरमङ्गनाः ॥ १२ ॥
नैवं भव गृहाणेदं यदाह वसुधाधिपः ।
भर्तुरिच्छामुपास्येह जनस्यास्य गतिर्भव ॥ १३ ॥
ज्येष्ठो वदान्यः कर्मण्यः स्वधर्मस्यापि रक्षिता ।
रक्षिता जीवलोकस्य बली रामोऽभिषिच्यताम् ॥ १४ ॥

इति सान्त्वैश्च तीक्ष्णैश्च कैकेयीं राजसंसदि ।
भूयः संक्षोभयामास सुमन्त्रस्तु कृताञ्जलिः ॥ १५ ॥
नैव सा क्षुभ्यते देवी न च स्म परिदूयते ।
न चास्य मुखवर्णस्य लक्ष्यते विक्रिया तदा ॥ १६ ॥

(स० ३५.)

---

१३ रामादीनां वल्कलपरिधानम् ।

ततः सुमन्त्रमैक्ष्वाको जगादेदं पुनर्वचः ।
सूत रत्नसुसंपूर्णा चतुर्विधबला चमूः ।
राघवस्यानुयात्रार्थं क्षिप्रं प्रतिविधीयताम् ॥ १ ॥

कैकेयी– राज्यं गतधनं साधो भरतो नाभिपत्स्यते ।
तवैव वंशे सगरो ज्येष्ठं पुत्रमुपारुधत् ।
असमञ्ज इति ख्यातं तथायं गन्तुमर्हति ॥ २ ॥ इति
तत्र वृद्धो महामात्रः कैकेयीमिदमब्रवीत् ।
असमञ्जो गृहीत्वा तु क्रीडतः पथि दारकान् ॥ ३ ॥
सरय्वां प्रक्षिपन्नप्सु रमते तेन दुर्मतिः ।
रामः किमकरोत्पापं येनैवमुपरुध्यते ॥ ४ ॥

रामः– त्यक्तभोगस्य मे राजन्वने वन्येन जीवतः ।
किं कार्यमनुयात्रेण चीराण्येवानयन्तु मे ॥ ५ ॥ इति
अथ चीराणि कैकेयी स्वयमाहृत्य राघवम् ।
उवाच परिधत्स्वेति जनौघे निरपत्रपा ॥ ६ ॥
स चीरे पुरुषव्याघ्रः कैकेय्याः प्रतिगृह्य ते ।
सूक्ष्मवस्त्रमवक्षिप्य मुनिवस्त्राण्यवस्त ह ॥ ७ ॥
लक्ष्मणश्चापि तत्रैव विहाय वसने शुभे ।
तापसाच्छादने चैव जग्राह पितुरग्रतः ॥ ८ ॥

अथात्मपरिधानार्थं सीता कौशेयवासिनी ।
संप्रेक्ष्य चीरं संत्रस्ता पृषती वागुरामिव ॥ ९ ॥
कृत्वा कण्ठे स्म सा चीरमेकमादाय पाणिना ।
अश्रुसंपूर्णनेत्रा च भर्तारमिदमब्रवीत् ।
कथं नु चीरं बध्नन्ति मुनयो वनवासिनः ॥ १० ॥
तस्यास्तत्क्षिप्रमागत्य रामो धर्मभृतां वरः ।
चीरं बबन्ध सीतायाः कौशेयस्योपरि स्वयम् ॥ ११ ॥
रामं प्रेक्ष्य तु सीताया बध्नन्तं चीरमुत्तमम् ।
अन्तःपुरचरा नार्यो मुमुचुर्वारि नेत्रजम् ॥ १२ ॥
ऊचुश्च परमायस्ता रामं ज्वलिततेजसम् ।
वत्स नैवं नियुक्तेयं वनवासे मनास्विनी ।
नेयमर्हति कल्याणी वस्तुं तापसवद्वने ॥ १३ ॥
कुरु नो याचनां पुत्र सीता तिष्ठतु भामिनी ।
धर्मनित्यः स्वयं स्थातुं न हीदानीं त्वमिच्छसि ॥ १४ ॥ **इति**
चीरे गृहीते तु त[illegible]ाष्पो नृपतेर्गुरुः ।
निवार्य सीतां कैकेयीं वसिष्ठो वाक्यमब्रवीत् ॥ १५ ॥
अतिप्रवृत्ते * दुर्मेधे कैकेयि कुलपांसनि ।
न गन्तव्यं वनं देव्या सीतया शीलवर्जिते ॥ १६ ॥
अनुष्ठास्यति रामस्य सीता प्रकृतमासनम् ।
आत्मा हि दाराः सर्वेषां दारसंग्रहवर्तिनाम् ॥ १७ ॥
अथ यास्यति वैदेही वनं रामेण संगता ।
वयमत्रानुयास्यामो पुरं चेदं गमिष्यति ॥ १८ ॥
एकस्य रामस्य वने निवासस्त्वया वृतः केकयराजपुत्रि ।
विभूषितेयं प्रतिकर्मनित्या वसत्वरण्ये सह राघवेण ॥ १९ ॥
रामः (पितरं प्रति)– मया विहीनां जननीं प्रपन्नां शोकसागरम् ।
अदृष्टपूर्वव्यसनां तात संमन्तुमर्हसि ॥ २० ॥

दशरथः– मन्ये खलु मया पूर्वं विवत्सा बहवः कृताः ।
प्राणिनो हिंसिता वापि तन्मामिदमुपस्थितम् ॥ २१ ॥
(स० ३६ ...... ३९.)

---

१४. रामप्रयाणम् ।

अनाचरन्तीं कृपणं मूर्ध्न्युपाघ्राय मैथिलीम् ।
तां भुजाभ्यां परिष्वज्य श्वश्रूर्वचनमब्रवीत् ॥ १ ॥
साध्वीनां निरतानां तु शीले सत्ये श्रुते स्थिते ।
स्त्रीणां पवित्रं परमं पतिरेको विशिष्यते ॥ २ ॥
स त्वया नावमन्तव्यः पुत्रः प्रव्राजितो वनम् ।
तव देवसमस्त्वेष निर्धनः सधनोऽपि वा ॥ ३ ॥

सीता– करिष्ये सर्वमेवाहमार्या यदनुशास्ति माम् ।
अभिज्ञास्मि यथा भर्तुर्वर्तितव्यं श्रुतं च मे ॥ ४ ॥
न मामसज्जनेनार्या समानयितुमर्हति ।
नापतिः सुखमेधेत या स्यादपि शतात्मजा ॥ ५ ॥
मितं ददाति हि पिता मितं भ्राता मितं सुतः ।
अमितस्य तु दातारं भर्तारं का न पूजयेत् ॥ ६ ॥

रामः– अम्ब मा दुःखिता भूत्वा पश्येस्त्वं पितरं मम ।
सुप्तायास्ते गमिष्यन्ति नव वर्षाणि पञ्च च ॥ ७ ॥
समग्रमिह संप्राप्तं मां द्रक्ष्यासि सुहृद्वृतम् । इति
अथ सार्धत्रयशता मातॄराह कृताञ्जलिः ॥ ८ ॥
संवासात्परुषं किंचिदज्ञानादपि यत्कृतम् ।
तन्मे समुपजानीत सर्वाश्चामन्त्रयामि* वः ॥ ९ ॥ **इति**
अथ रामश्च सीता च लक्ष्मणश्च कृताञ्जलिः ।
उपसंगृह्य राजानं चक्रुर्दीनाः प्रदक्षिणम् ॥ १० ॥
अन्वक्षं लक्ष्मणो भ्रातुः कौसल्यामभ्यवादयत् ।
अपि मातुः सुमित्राया जग्राह चरणौ पुनः ।
तं वन्दमानं रुदती माता सौमित्रिमब्रवीत् ॥ ११ ॥

रामं दशरथं विद्धि मां विद्धि जनकात्मजाम् ।
अयोध्यामटवीं विद्धि गच्छ तात यथासुखम् ॥ १२ ॥ इति
सीतातृतीयानारूढान्दृष्ट्वा रथमचोदयत् ।
सुमन्त्रः संमतानश्वान्वायुवेगसमाञ्जवे ॥ १३ ॥

(स० ३९, ४०.)

---

१५ सप्रजस्य राज्ञो रामानुधावनम् ।

ततः सबालवृद्धा सा पुरी परमपीडिता ।
राममेवाभिदुद्राव घर्मार्तः सलिलं यथा ॥ १ ॥
पौराः— संयच्छ वाजिनां रश्मीन्सूत याहि शनैः शनैः ।
मुखं द्रक्ष्याम* रामस्य दुर्दर्शं नो भविष्यति ॥ २ ॥ **इति**
अथ राजा वृतः स्त्रीभिर्दीनाभिर्दीनचेतनः ।
निर्जगाम प्रियं पुत्रं द्रक्ष्यामीति ब्रुवन्गृहात् ॥ ३ ॥
दृष्ट्वा तु नृपतिः श्रीमानेकचित्तगतं पुरम् ।
निपपातैव दुःखेन कृत्तमूल इव द्रुमः ॥ ४ ॥
प्रत्यागारमिवायान्ती सवत्सा वत्सकारणात् ।
बद्धवत्सा यथा धेनू राममाताभ्यधावत ॥ ५ ॥
तिष्ठेति राजा चुक्रोश याहि याहीति राघवः ।
सुमन्त्रस्य बभूवात्मा चक्रयोरिव चान्तरा ॥ ६ ॥
यमिच्छेत्पुनरायातं नैनं दूरमनुव्रजेत् ।
इत्यमात्या महाराजमूचुर्दशरथं वचः ॥ ७ ॥
न्यवर्तत जनो राज्ञो रामं कृत्वा प्रदक्षिणम् ।
मनसाप्याशुवेगेन न न्यवर्तत मानुषम् ॥ ८ ॥

(स० ४०.)

---

१६ कौसल्यादशरथयोर्विलापः ।

न पश्यति रजोऽप्यस्य यदा रामस्य भूमिपः ।
तदार्तश्च विषण्णश्च पपात धरणीतले ।
विललाप स दुःखार्तः प्रियं पुत्रमनुस्मरन् ॥ १ ॥
यः सुखेनोपधानेषु शेते चन्दनरूषितः ।
काष्ठं वा यदि वाश्मानमुपधाय शयिष्यते ।
उत्थास्यति च मेदिन्याः कृपणः पांसुगुण्ठितः ॥ २ ॥
सा नूनं जनकस्येष्टा सुता सुखसदोचिता ।
कण्टकाक्रमणक्लान्ता वनमद्य गमिष्यति ॥ ३ ॥
(कैकेयीं प्रति) केवलार्थपरां हि त्वां त्यक्तधर्मां त्यजाम्यहम् ।
(कौसल्यां प्रति) न त्वां पश्यामि कौसल्ये साधु मां पाणिना स्पृश
रामं मेऽनुगता दृष्टिरद्यापि न निवर्तते ॥ ४ ॥
कौसल्या–अपीदानीं स कालः स्यान्मम शोकक्षयः शिवः ।
सहभार्यं सह भ्रात्रा पश्येयमिह राघवम् ॥ ५ ॥
सुमित्रा (कौसल्यां प्रति)– शिष्टैराचरिते सम्यक्शश्वत्प्रेत्यफलोदये ।
रामो धर्मे स्थितः श्रेष्ठो न स शोच्यः कदाचन ॥६॥
पुनः प्रविष्टं दृष्ट्वा तमभिषिक्तं महाश्रियम् ।
समुत्स्रक्ष्यासि नेत्राभ्यां शीघ्रमानन्दजं जलम् ॥ ७ ॥
(स० ४२,४३,४४.)

---

१७ अनिच्छतां पौराणां सविषादं निवर्तनम् ।

अनुरक्ता महात्मानं रामं सत्यपराक्रमम् ।
अनुजग्मुः प्रयान्तं तं वनवासाय मानवाः ।
उवाच रामः सस्नेहं ताः प्रजाः स्वाः प्रजा इव ॥ १ ॥
या प्रीतिर्बहुमानश्च मय्ययोध्यानिवासिनाम् ।
मत्प्रियार्थं विशेषेण भरते सा विधीयताम् ॥ २ ॥ इति

ते द्विजास्त्रिविधं वृद्धा ज्ञानेन वयसौजसा ।
वयःप्रकम्पशिरसो दूरादूचुरिदं वचः ॥ ३ ॥
वहन्तो जवना रामं भो भो जात्यास्तुरंगमाः ॥
निवर्तध्वं न गन्तव्यं याचनां प्रतिवेदिताः ॥ ४ ॥
एवमार्तप्रलापांस्तान्वृद्धान्प्रलपतो द्विजान् ।
अवेक्ष्य सहसा रामो रथादवततार ह ॥ ५ ॥
पद्भ्यामेव जगामाथ ससीतः सहलक्ष्मणः ।
द्विजातीन्हि पदातींस्तान्रामो वनपरायणः ।
न शशाक घृणाचक्षुः परिमोक्तुं रथेन सः ॥ ६ ॥

ब्राह्मणाः–याचितो नो निवर्तस्व हंसशुक्लशिरोरुहैः ।
शिरोभिर्निभृताचार महीपतनपांशुलैः ॥ ७ ॥
अनुगन्तुमशक्तास्त्वां मूलैरुद्धतवेगिनः ।
सशब्दं वायुवेगेन विक्रोशन्तीव पादपाः ॥ ८ ॥
निश्चेष्टाहारसंचारा वृक्षैकस्थाननिश्चिताः ।
पक्षिणोऽपि प्रयाचन्ते सर्वभूतानुकम्पनम् ॥ ९ ॥
एवं विक्रोशतां तेषां द्विजातीनां निवर्तने ।
ददृशे तमसा तत्र वारयन्तीव राघवम् ॥ १० ॥
गोकुलाकुलतीरायास्तमसाया विदूरतः ।
अवसत्तत्र तां रात्रिं रामः प्रकृतिभिः सह ॥ ११ ॥
उत्थाय च महातेजाः प्रकृतीस्ता निशाम्य च ।
अब्रवीद्भ्रातरं रामो लक्ष्मणं पुण्यलक्षणम् ॥ १२ ॥
यावदेव तु संसुप्तास्तावदेव वयं लघु ।
रथमारुह्य गच्छामः पन्थानमकुतोभयम् ॥ १३ ॥
तं स्यन्दनमधिष्ठाय काकुत्स्थः सपरिच्छदः ।
शीघ्रगामाकुलावर्तां तमसामतरन्नदीम् ॥ १४ ॥

रामः– उदङ्मुखः प्रयाहि त्वं रथमारुह्य सारथे।
मुहूर्तं त्वरितं गत्वा निवर्तय रथं पुनः ॥ १५ ॥

यथा न विद्युः पौरा मां तथा कुरु समाहितः ।
पौरा ह्यात्मकृताद्दुःखाद्विप्रमोच्या नृपात्मजैः ॥ १६ ॥ **इति**
प्रभातायां तु शर्वर्यां पौरास्ते राघवं विना ।
रथमार्गानुसारेण गत्वा किंचित्ततः क्षणम् ॥ १७ ॥
आलोकमपि रामस्य न पश्यन्ति स्म दुःखिताः ।
कृपणाः करुणा वाचो वदन्ति स्म मनीषिणः ॥ १८ ॥
धिगस्तु खलु तां निद्रां ययापहृतचेतसः ।
नाद्य* पश्यामहे रामं पृथूरस्कं महाभुजम् ॥ १९ ॥ इति
तदा यथागतेनैव मार्गेण क्लान्तचेतसः ।
अयोध्यामगमन्सर्वे पुरीं व्यथितसज्जनाम् ॥ २० ॥
चन्द्रहीनमिवाकाशं तोयहीनमिवार्णवम् ।
अपश्यन्निहतानन्दं नगरं ते विचेतसः ॥ २१ ॥
स्वं स्वं निलयमागम्य पुत्रदारैः समावृताः ।
अश्रूणि मुमुचुः सर्वे बाष्पेण पिहिताननाः ॥ २२ ॥
तदा स्त्रियो रामनिमित्तमातुरा यथा सुते भ्रातरि वा विवासिते ।
विलप्य दीना रुरुदुर्विचेतसः सुतैर्हि तासामधिकोऽपि सोऽभवत् २३।
(स० ४५ …… ४८.

---

१८ गुहसमागमः ।

विशालान्कोसलान्रम्यान्यात्वा लक्ष्मणपूर्वजः ।
अयोध्यामुन्मुखो धीमान्प्राञ्जलिर्वाक्यमब्रवीत् ॥ १ ॥
आपृच्छे त्वां पुरि श्रेष्ठे काकुत्स्थपरिपालिते ।
दैवतानि च यानि त्वां पालयन्त्यावसन्ति च ॥ २ ॥
निवृत्तवनवासस्त्वामनृणो जगतीपतेः ।
पुनर्द्रक्ष्यामि मात्रा च पित्रा च सह संगतः ॥ ३ ॥ इति
तत्र त्रिपथगां दिव्यां शीततोयामशैवलाम् ।
विष्णुपादच्युतां दिव्यामपापां पापनाशिनीम् ॥ ४ ॥

शंकरस्य जटाजूटाद्भ्रष्टां सागरतेजसा ।
ददर्श राघवो गङ्गां रम्यामृषिनिषेविताम् ॥ ५ ॥
आससाद महाबाहुः शृङ्गवेरपुरं प्रति ।
रथादवातरत्तस्मात्सभार्यः सहलक्ष्मणः ॥ ६ ॥
तत्र राजा गुहो नाम रामस्यात्मसमः सखा ।
तमार्तः संपरिष्वज्य गुहो राघवमब्रवीत् ।
यथायोध्या तथेदं ते राम किं करवाणि ते ॥ ७ ॥
रामः– दिष्ट्या त्वां गुह पश्यामि ह्यरोगं सह बान्धवैः ।
अपि ते कुशलं राष्ट्रे मित्रेषु च वनेषु च ॥ ८ ॥ इति ।
ततश्चीरोत्तरासंगः संध्यामन्वास्य पश्चिमाम् ।
जलमेवाददे भोज्यं लक्ष्मणेनाहृतं स्वयम् ॥ ९ ॥
गुहोऽपि सह सूतेन सौमित्रिमनुभाषयन् ।
अन्वजागस्ततो राममप्रमत्तो धनुर्धरः ॥ १० ॥
प्रभातायां तु शर्वर्यां पृथुवक्षा महायशाः ।
उवाच रामः सौमित्रिं लक्ष्मणं शुभलक्षणम् ।
तराम जाह्नवीं सौम्य शीघ्रगां सागरंगमाम् ॥ ११ ॥
स तु रामस्य वचनं निशम्य प्रतिगृह्य च ।
उपोह्य रुचिरां नावं गुहो राघवमब्रवीत् ।
उपस्थितेयं नौर्देव भूयः किं करवाणि ते ॥ १२ ॥

(स० ४९,५०,५२.)

---

१९ रामसंदेशः ।

रामः (सुमन्त्रं प्रति):–इक्ष्वाकूणां त्वया तुल्यं सुहृदं नोपलक्षये ।
यथा दशरथो राजा मां न शोचेत्तथा कुरु ॥ १ ॥
अदृष्टदुःखं राजानं वृद्धमार्यं जितेन्द्रियम् ।
ब्रूयास्त्वमभिवाद्यैव मम हेतोरिदं वचः ॥ २ ॥

चतुर्दशसु वर्षेषु निवृत्तेषु पुनः पुनः ।
लक्ष्मणं मां च सीतां च * द्रक्ष्यसे शीघ्रमागतान् ॥ ३ ॥
सीताया मम चार्यस्य वचनाल्लक्ष्मणस्य च ।
आरोग्यं ब्रूहि कौसल्यामथ पादाभिवन्दनम् ।
अन्याश्च देवीः सहिताः कैकेयीं च पुनः पुनः ॥ ४ ॥
भरतश्चापि वक्तव्यो यथा राजनि वर्तसे ।
तथा मातृषु वर्तेथाः सर्वास्वेवाविशेषतः ॥ ५ ॥

सुमन्त्रः– प्रसीदेच्छामि तेऽरण्ये भवितुं प्रत्यनन्तरः ।
प्रीत्याभिहितमिच्छामि भव मे प्रत्यनन्तरः ॥ ६ ॥
आर्तनादो हि यः पौरैरुन्मुक्तस्त्वत्प्रवासने ।
सरथं मां निशाम्यैव कुर्युः शतगुणं ततः ॥ ७ ॥

रामः– जानामि परमां भक्तिमहं ते भर्तृवत्सल ।
शृणु चापि यदर्थं त्वां प्रेषयामि पुरीमितः ॥ ८ ॥
नगरीं त्वां गतं दृष्ट्वा जननी मे यवीयसी ।
कैकेयी प्रत्ययं गच्छेदिति रामो वनं गतः ॥ ९ ॥

(स० ५२.)

२० गङ्गातरणम् ।

रामः (गुहं प्रति)– नेदानीं गुह योग्योऽयं वासो मे सजने वने ।
अवश्यमाश्रमे वासः कर्तव्यस्तद्गतो विधिः ।
जटाः कृत्वा गमिष्यामि न्यग्रोधक्षीरमानय ॥ १ ॥ इति
तत्क्षीरं राजपुत्राय गुहः क्षिप्रमुपाहरत् ।
लक्ष्मणस्यात्मनश्चैव रामस्तेनाकरोज्जटाः ॥ २ ॥
अनुज्ञाय सुमन्त्रं च सबलं चैव तं गुहम् ।
आस्थाय नावं रामस्तु चोदयामास नाविकान् ॥ ३ ॥
मध्यं तु समनुप्राप्य भागीरथ्यास्त्वनिन्दिता ।
वैदेही प्राञ्जलिर्भूत्वा तां नदीमिदमब्रवीत् ॥ ४ ॥

पुत्रो दशरथस्यायं महाराजस्य धीमतः ।
भ्रात्रा सह मया चैव पुनः प्रत्यागमिष्यति ॥ ५ ॥
ततस्त्वां देवि सुभगे क्षेमेण पुनरागता ।
यक्ष्ये प्रमुदितां गङ्गे सर्वकामसमृद्धिनी ॥ ६ ॥ इति
तीरं तु समनुप्राप्य नावं हित्वा नरर्षभः ।
प्रातिष्ठत सह भ्रात्रा वैदेह्या च परंतपः ॥ ७ ॥
स लोकपालप्रतिमप्रभावस्तीर्त्वा महात्मा वरदो महानदीम् ।
ततः समृद्धाञ्शुभसस्यशालिनः क्षणेन वत्सान्मुदितानुपागमत् ॥ ८ ॥

(स० ५२.)

---

२१ सूतसंमुखे दशरथस्य रामहेतोर्विलापः ।

दशरथः– कैकेय्या विनियुक्तेन पापाभिजनभावया ।
मया न मन्त्रकुशलैर्वृद्धैः सह समर्थितम् ॥ १ ॥
भवितव्यतया नूनमिदं वा व्यसनं महत् ।
कुलस्यास्य विनाशाय प्राप्तं सूत यदृच्छया ॥ २ ॥
सूत यद्यस्ति ते किंचिन्मयापि सुकृतं कृतम् ।
त्वं प्रापयाशु मां रामं प्राणाः संत्वरयन्ति माम् ॥ ३ ॥
यद्यद्यापि ममैवाज्ञा निवर्तयतु राघवम् ।
न शक्ष्यामि विना रामं मुहूर्तमपि जीवितुम् ॥ ४ ॥
अथ वापि महाबाहुर्गतो दूरं भविष्यति ।
मामेव रथमारोप्य शीघ्रं रामाय दर्शय ॥ ५ ॥
वृत्तदंष्ट्रो महेष्वासः क्वासौ लक्ष्मणपूर्वजः ।
यदि जीवामि साध्वेनं पश्येयं सीतया सह ॥ ६ ॥
अतो नु किं दुःखतरं योऽहमिक्ष्वाकुनन्दनम् ।
इमामवस्थामापन्नो नेह पश्यामि राघवम् ॥ ७ ॥

हा राम रामानुज हा हा वैदेहि तपस्विनि ।
न मां जानीथ दुःखेन म्रियमाणमनाथवत् ॥ ८ ॥
रामशोकमहावेगः सीताविरहपारगः ।
श्वसितोर्मिमहावर्तो बाष्पवेगजलाविलः ॥ ९ ॥
बाहुविक्षेपमीनोऽसौ विक्रन्दितमहास्वनः ।
प्रकीर्णकेशशैवालः कैकेयीवडवामुखः ॥ १० ॥
ममाश्रुवेगप्रभवः कुब्जावाक्यमहाग्रहः ।
वरवेलो नृशंसाया रामप्रव्राजना यतः ॥ ११ ॥
यस्मिन्बत निमग्नोऽहं कौसल्ये राघवं विना ।
दुस्तरो जीवता देवि मयायं शोकसागरः ॥ १२ ॥
(स० ५९.)

---

२२ वनेऽपि परिहृष्टमानसा सीता ।

बाष्पवेगोपहतया स वाचा *सज्जमानया ।
इदमाश्वासयन्देवीं सूतः प्राञ्जलिरब्रवीत् ॥ १ ॥
विजनेऽपि वने सीता वासं प्राप्य गृहेष्विव ।
विस्रम्भं लभतेऽभीता रामे विन्यस्तमानसा ॥ २ ॥
नास्या दैन्यं कृतं किंचित्सुसूक्ष्ममपि लक्ष्यते ।
उचितेव प्रवासानां वैदेही प्रतिभाति मे ॥ ३ ॥
नगरोपवनं गत्वा यथा स्म रमते पुरा ।
तथैव रमते सीता निर्जनेषु वनेष्वपि ॥ ४ ॥
बालेव रमते सीताऽबालचन्द्रनिभानना ।
रामारामे ह्यदीनात्मा विजनेऽपि वने सती ॥ ५ ॥
अध्वना वातवेगेन संभ्रमेणातपेन च ।
न विगच्छति वैदेह्याश्चन्द्रांशुसदृशी प्रभा ॥ ६ ॥
सदृशं शतपत्त्रस्य पूर्णचन्द्रोपमप्रभम् ।
वदनं तद्वदान्याया वैदेह्या न विकम्पते ॥ ७ ॥

अलक्तरसरक्ताभावलक्तरसवार्जितौ ।
अद्यापि चरणौ तस्याः पद्मकोशसमप्रभौ ॥ ८ ॥
नूपुरोत्कृष्टलीलेव खेलं गच्छति भामिनी ।
इदानीमपि वैदेही तद्रागान्यस्तभूषणा ॥ ९ ॥
गजं वा वीक्ष्य सिंहं वा व्याघ्रं वा वनमाश्रिता ।
नाहारयति संत्रासं बाहू रामस्य संश्रिता ॥ १० ॥
(स० ६०.)

---

२३ कौसल्यानुप्रसादनम् ।

वनं गते धर्मरते रामे रमयतां वरे ।
कौसल्या रुदतीवार्ता भर्तारमिदमब्रवीत् ॥ १ ॥
सा नूनं तरुणी श्यामा सुकुमारी सुखोचिता ।
कथमुष्णं च शीतं च मैथिली विषहिष्यते ॥ २ ॥
भुक्त्वाशनं विशालाक्षी सूपदंशान्वितं शुभम् ।
वन्यं नैवारमाहारं कथं सीतोपभोक्ष्यते ॥ ३ ॥
गीतवादित्रनिर्घोषं श्रुत्वा शुभसमान्विता ।
कथं क्रव्यादसिंहानां शब्दं श्रोष्यत्यशोभनम् ॥ ४ ॥
पद्मवर्ण सुकेशान्तं पद्मनिःश्वासमुत्तमम् ।
कदा द्रक्ष्यामि रामस्य वदनं पुष्करेक्षणम् ॥ ५ ॥
वज्रसारमयं नूनं हृदयं मे न संशयः ।
अपश्यन्त्या न तं यद्वै फलतीदं सहस्रधा ॥ ६ ॥
यदि पञ्चदशे वर्षे राघवः पुनरैष्यति ।
जह्याद्राज्यं च कोशं च भरतो नोपलक्ष्यते ॥ ७ ॥
तथा कनीयसा भ्रात्रा भुक्तं राज्यं विशांपते ।
भ्राता ज्येष्ठो वरिष्ठश्च किमर्थं नावमन्यते ॥ ८ ॥
न परेणाहृतं भक्ष्यं व्याघ्रः खादितुमिच्छति ।
एवमेव नरव्याघ्रः परलीढं न मन्यते ॥ ९ ॥

नैवंविधमसत्कारं राघवो मर्षयिष्यति ।
बलवानिव शार्दूलो वालधेरभिमर्शनम् ॥ १० ॥
स तादृशः सिंहबलो वृषभाक्षो नरर्षभः ।
स्वयमेव हतः पित्रा जलजेनात्मजो यथा ॥ ११ ॥
गतिरेका पतिर्नार्या द्वितीया गतिरात्मजः ।
तृतीया ज्ञातयो राजंश्चतुर्थी नैव विद्यते ॥ १२ ॥
तत्र त्वं मम नैवासि रामश्च वनमाहितः ।
न वनं गन्तुमिच्छामि सर्वथा हा हता त्वया ॥ १३ ॥
एवं तु क्रुद्धया राजा राममात्रा सशोकया ।
श्रावितः परुषं वाक्यं कौसल्यामाह दुःखितः ॥ १४ ॥
प्रसादये त्वां कौसल्ये रचितोऽयं मयाञ्जलिः ।
वत्सला चानृशंसा च त्वं हि नित्यं परेष्वपि ॥ १५ ॥
भर्ता तु खलु नारीणां गुणवान्निर्गुणोऽपि वा ।
धर्मं*विमृशमानानां प्रत्यक्षं देवि दैवतम् ॥ १६ ॥
सा त्वं धर्मपरा नित्यं दृष्टलोकपरावरा ।
नार्हसे * विप्रियं वक्तुं दुःखितापि सुदुःखितम् ॥ १७ ॥
तद्वाक्यं करुणं राज्ञः श्रुत्वा दीनस्य भाषितम् ।
कौसल्या व्यसृजद्बाष्पं प्रणालीव नवोदकम् ॥ १८ ॥
सा मूर्ध्नि बद्ध्वा रुदती राज्ञः पद्मामिवाञ्जलिम् ।
संभ्रमादब्रवीत्त्रस्ता त्वरमाणाक्षरं वचः ॥ १९ ॥
प्रसीद शिरसा याचे भूमौ निपतितास्मि ते ।
याचितास्मि हता देव क्षन्तव्याहं न हि त्वया ॥ २० ॥
नैषा हि सा स्त्री भवति श्लाघनीयेन धीमता ।
उभयोर्लोकयोर्लोके पत्या या संप्रसाद्यते ॥ २१ ॥
जानामि धर्मं धर्मज्ञ त्वां जाने सत्यवादिनम् ।
पुत्रशोकार्तया तत्तु मया किमपि भाषितम् ॥ २२ ॥

शोको नाशयते* धैर्यं शोको नाशयते श्रुतम् ।
शोको नाशयते सर्वं नास्ति शोकसमो रिपुः ॥ २३ ॥
शक्यमापतितः सोढुं प्रहारो रिपुहस्ततः ।
सोढुमापतितः शोकः सुसूक्ष्मोऽपि न शक्यते ॥ २४ ॥
(स० ६१, ६२.)

---

२४ जीवितान्तकाले दशरथस्योक्तयः ।

दशरथः— दूता वैवस्वतस्यैते कौसल्ये त्वरयन्ति माम् ।
चक्षुषा त्वां न पश्यामि स्मृतिर्मम विलुप्यते ॥ १ ॥
यदि मां संस्पृशेद्रामः सकृदप्यालभेत वा ।
धनं वा यौवराज्यं वा जीवेयमिति में मतिः ॥ २ ॥
न तन्मे सदृशं देवि यन्मया राघवे कृतम् ।
सदृशं तत्तु तस्यैव यदनेन कृतं मयि ॥ ३ ॥
दुर्वृत्तमपि कः पुत्रं त्यजेद्भुवि विचक्षणः ।
कश्च प्रव्राज्यमानो वा नासूयेत्पितरं सुतः ॥ ४ ॥
अतस्तु किं दुःखकरं यदहं जीवितक्षये ।
न हि पश्यामि धर्मज्ञं रामं सत्यपराक्रमम् ॥ ५ ॥
तस्यादर्शनजः शोकः सुतस्याप्रतिकर्मणः ।
उच्छोषयति वै प्राणान्वारिस्तोकमिवातपः ॥ ६ ॥
न ते मनुष्या देवास्ते ये चारुशुभकुण्डलम् ।
मुखं द्रक्ष्यन्ति रामस्य वर्षे पञ्चदशे पुनः ॥ ७ ॥
कौसल्ये चित्तमोहेन हृदयं सीदतेतराम्* ।
वेदये नच संयुक्ताञ्शब्दस्पर्शरसानहम् ॥ ८ ॥
चित्तनाशाद्विपद्यन्ते सर्वाण्यवेन्द्रियाणि हि ।
क्षीणस्नेहस्य दीपस्य संरक्ता रश्मयो यथा ॥ ९
अयमात्मभवः शोको मामनाथमचेतनम् ।
संसाधयति वेगेन यथा कूलं नदीरयः ॥ १० ॥

हा राघव महाबाहो हा ममायासनाशन ।
हा पितृप्रिय मे नाथ हा ममासि गतः सुत ॥ ११ ॥
हा कौसल्ये न पश्यामि हा सुमित्रे तपस्विनि ।
हा नृशंसे ममामित्रे कैकेयि कुलपांसनि ॥ १२ ॥
इति मातुश्च रामस्य सुमित्रायाश्च संनिधौ ।
राजा दशरथः शोचञ्जीवितान्तमुपागमत् ॥ १३ ॥

(स० ६४.)

---

२५ दशरथपत्नीनां शोकः ।

कौसल्या च सुमित्रा च दृष्ट्वा स्पृष्ट्वा च पार्थिवम् ।
हा भर्तेति परिक्रुश्य पेततुर्धरणीतले ॥ १ ॥
नृपे शान्तगुणे जाते कौसल्यां पतितां भुवि ।
अपश्यंस्ताः स्त्रियः सर्वा हतां नागवधूमिव ॥ २ ॥
ताभिः स बलवान्नादः क्रोशन्तीभिरनुद्रुतः ।
येन स्फीतीकृतो भूयस्तद्गृहं समनादयत् ॥ ३ ॥
तत्परित्रस्तसंभ्रान्तपर्युत्सुकजनाकुलम् ।
सर्वतस्तुमुलाक्रन्दं परितापार्तबान्धवम् ॥ ४ ॥
सद्योनिपतितानन्दं दीनं विक्लवदर्शनम् ।
बभूव नरदेवस्य सद्म दिष्टान्तमीयुषः ॥ ५ ॥
तमग्निमिव संशान्तमम्बुहीनमिवार्णवम् ।
गतप्रभमिवादित्यं स्वर्गस्थं प्रेक्ष्य भूमिपम् ॥ ६ ॥
कौसल्या बाष्पपूर्णाक्षी विविधं शोककर्शिता ।
उपगृह्य शिरो राज्ञः कैकेयीं प्रत्यभाषत ॥ ७ ॥
सकामा भव कैकेयि भुङ्क्ष्व राज्यमकण्टकम् ।
त्यक्त्वा राजानमेकाग्रा नृशंसे दुष्टचारिणि ॥ ८ ॥

विहाय मां गतो रामो भर्ता च स्वर्गतो मम ।
विपथे सार्थहीनेव नाहं जीवितुमुत्सहे ॥ ९ ॥ इति
बाहूनुच्छ्रित्य कृपणा नेत्रप्रस्रवणैर्मुखैः ।
अरुदञ्शोकसंतप्ताः सर्वा अपि वरस्त्रियः ॥ १० ॥
हा महाराज रामेण संततं प्रियवादिना ।
विहीनाः सत्यसन्धेन किमर्थं विजहासि नः ॥ ११ ॥
कैकेय्या दुष्टभावाया राघवेण विवर्जिताः ।
कथं सपत्न्या वत्स्यामः समीपे विधवा वयम् ॥ १२ ॥
यया च राजा रामश्च लक्ष्मणश्च महाबलः ।
सीतया सह संत्यक्ताः सा कमन्यं न हास्यति ॥ १३ ॥ इति
निशा नक्षत्रहीनेव स्त्रीव भर्तृविवर्जिता ।
पुरी नाराजतायोध्या हीना राज्ञा महात्मना ॥ १४ ॥
बाष्पपर्याकुलजना हाहाभूतकुलाङ्गना ।
शून्यचत्वरवेश्मान्ता न बभ्राजे यथापुरम् ॥ १५ ॥

गते तु शोकात्त्रिदिवं नराधिपे महीतलस्थासु नृपाङ्गनासु च ।
निवृत्तचारः सहसा गतो रविः प्रवृत्तचारा रजनी ह्युपस्थिता ॥ १६ ॥
ऋते तु पुत्राद्दहनं महीपतेर्नारोचयंस्ते सुहृदः समागताः ।
इतीव तस्मिञ्शयने न्यवेशयान्विचिन्त्य राजानमचिन्त्यदर्शनम् ॥ १७ ॥
गतप्रभा द्यौरिव भास्करं विना व्यपेतनक्षत्रगणेव शर्वरी ।
पुरी बभासे रहिता महात्मनाकण्ठास्रकण्ठाकुलमार्गचत्वरा ॥ १८ ॥
नराश्च नार्यश्च समेत्य संघशो विगर्हमाणा भरतस्य मातरम् ।
तदा नगर्यां नरदेवसंक्षये बभूवुरार्ता न च शर्म लेभिरे ॥ १९ ॥

(स० ६६.)

---

२६ भरतस्य शोकः।

ततः शोकेन संवीतः पितुर्मरणदुःखितः ।
विललाप महातेजा भ्रान्ताकुलितचेतनः ॥ १ ॥

एतत्सुरुचिरं भाति पितुर्मे शयनं पुरा ।
शशिनेवामलं रात्रौ गगनं तोयदात्यये ॥ २ ॥
तदिदं न विभात्यद्य विहीनं तेन धीमता ।
व्योमेव शशिना हीनं शुष्कोप इव सागरः ॥ ३ ॥
क्व स पाणिः सुखस्पर्शस्तातस्याक्लिष्टकर्मणः ।
यो हि मां रजसा ध्वस्तमभीक्ष्णं परिमार्जति ४ ॥
तात यस्मिन्निसृष्टोऽहं त्वया भ्रातरि राघवे ।
तस्मिन्वनं प्रव्रजिते शून्ये त्यक्तोऽस्म्यहं त्वया ॥ ५ ॥
यस्या गतिरनाथायाः पुत्रः प्रव्राजितो वनम् ।
तामम्बां तात कौसल्यां त्यक्त्वा त्वं क्व गतो नृप ॥ ६ ।
मन्थराप्रभवस्तीव्रः कैकेयीग्राहसंकुलः ।
वरदानमयोऽक्षोभ्योऽमज्जयच्छोकसागरः ॥ ७ ॥
सुकुमारं च बालं च सततं लालितं त्वया ।
क्व तात भरतं हित्वा विलपन्तं गतो भवान् ॥ ८ ॥
ननु भोज्येषु पानेषु वस्त्रेष्वाभरणेषु च ।
प्रवारयति सर्वान्नस्तन्नः कोऽद्य करिष्यति ॥ ९ ॥

(स० ७२, ७७.)

---

२७ भरतकृतं कैकेयीनिर्भर्त्सनम् ।

परेतं पितरं श्रुत्वा भ्रातरौ च विवासितौ ।
भरतो दुःखसंतप्त इदं वचनमब्रवीत् ॥ १ ॥
मातृरूपे ममामित्रे नृशंसे राज्यकामुके ।
न तेऽहमभिभाष्योऽस्मि दुर्वृत्ते पतिघातिनि ॥ २ ॥
न त्वमश्वपतेः कन्या धर्मराजस्य धीमतः ।
राक्षसी तत्र जातासि कुलप्रध्वंसिनी पितुः ॥ ३ ॥
राज्याद्भ्रंशस्व कैकेयि नृशंसे दुष्टचारिणि ।
परित्यक्तासि धर्मेण मा मृतं रुदती भव ॥ ४ ॥

किं नु कार्यं हतस्येह मम राज्येन शोचतः ।
विहीनस्याथ पित्रा च भ्रात्रा पितृसमेन च ॥ ५ ॥
दुःखे मे दुःखमकरोर्व्रणे क्षारमिवाददाः ।
राजानं प्रेतभावस्थं कृत्वा रामं च तापसम् ॥ ६ ॥
कुलस्य त्वमभावाय कालरात्रिरिवागता ।
अङ्गारमुपगुह्य स्म पिता मे नावबुद्धवान् ॥ ७ ॥
नन्वार्योऽपि च धर्मात्मा त्वयि वृत्तिमनुत्तमाम् ।
वर्तते गुरुवृत्तिज्ञो यथा मातरि वर्तते ॥ ८ ॥
तथा ज्येष्ठा हि मे माता कौसल्या दीर्घदर्शिनी ।
त्वयि धर्मं समास्थाय भगिन्यामिव वर्तते ॥ ९ ॥
तस्याः पुत्रं महात्मानं चीरवल्कलवाससम् ।
प्रस्थाप्य वनवासाय कथं पापे न शोचसि ॥ १० ॥
अहं हि पुरुषव्याघ्रावपश्यन्रामलक्ष्मणौ ।
केन शक्तिप्रभावेण राज्यं रक्षितुमुत्सहे ॥ ११ ॥
अथवा मे भवेच्छक्तिर्योगैर्बुद्धिबलेन वा ।
सकामां न करिष्यामि त्वामहं पुत्रगर्धिनीम् ॥ १२ ॥
न मे विकाङ्क्षा जायेत त्यक्तुं त्वां पापनिश्चयाम् ।
यदि रामस्य नावेक्षा त्वयि स्यान्मातृवत्सदा ॥ १३ ॥
*आनयिष्याम्यहं ज्येष्ठं भ्रातरं राघवं वनात् ।
स्वयं चैव प्रवेक्ष्यामि वनं मुनिनिषेवितम् ॥ १४ ॥
न ह्यहं पापसंकल्पे पापे पापं त्वया कृतम् ।
शक्तो धारयितुं पौरैरश्रुकण्ठैर्निरीक्षितः ॥ १५ ॥
सा त्वमग्निं प्रविश वा स्वयं वा विश दण्डकान् ।
रज्जुं बद्ध्वाथ वा कण्ठे न हि तेऽन्यत्परायणम् ॥ १६ ॥

(स० ७३, ७४.)

---

२८ सीताचित्तोपलालनम् ।

दीर्घकालोषितस्तस्मिन्गिरौ गिरिवरप्रियः ।
वैदेह्याः प्रियमाकाङ्क्षन्स्वं च चित्तं विलोभयन् ॥ १ ॥
अथ दाशरथिश्चित्रं चित्रकूटमदर्शयत् ।
भार्याममरसंकाशः शचीमिव पुरंदरः ॥ २ ॥
पश्येममचलं भद्रे नानाद्विजगणायुतम् ।
शिखरैः खमिवोद्विद्धैर्धातुमद्भिर्विभूषितम् ॥ ३ ॥
पुष्पवद्भिः फलोपेतैश्छायावद्भिर्मनोरमैः ।
नानातरुभिराकीर्णः श्रियं पुष्यत्ययं गिरिः ॥ ४ ॥
जलप्रपातैरुद्भेदैर्निष्पन्दैश्च क्वचित्क्वचित् ।
स्रवद्भिर्भात्ययं शैलः स्रवन्मद इव द्विपः ॥ ५ ॥
गुहासमीरणो गन्धान्नानापुष्पभवान्बहून् ।
घ्राणसंतर्पणोऽभ्येत्य कं नरं न प्रहर्षयेत् ॥ ६ ॥
वैदेहि रमसे कच्चिच्चित्रकूटे मया सह ।
पश्यन्ती विविधान्भावान्मनोवाक्कायसंमतान् ॥ ७ ॥
यदीह शरदोऽनेकास्त्वया सार्धमनिन्दिते ।
लक्ष्मणेन च वत्स्यामि न मां शोकः प्रधर्षति ॥ ८ ॥
न राज्यभ्रंशनं भद्रे न सुहृद्भिर्विनाभवः ।
मनो मे बाधते दृष्ट्वा रमणीयमिमं गिरिम् ॥ ९ ॥
अनेन वनवासेन मम प्राप्तं फलद्वयम् ।
पितुश्चानृणता धर्मे भरतस्य प्रियं तथा ॥ १० ॥
विचित्रपुलिनां रम्यां पश्य मन्दाकिनीं नदीम् ।
नानाविधैस्तीररुहैर्वृतां पुष्पफलद्रुमैः ॥ ११ ॥
मृगयूथनिर्पीतानि कलुषाम्भांसि सांप्रतम् ।
तीर्थानि रमणीयानि रतिं संजनयन्ति मे ॥ १२ ॥
जटाजिनधराः काले वल्कलोत्तरवाससः ।
ऋषयस्त्ववगाहन्ते नदीं मन्दाकिनीं प्रिये ॥ १३ ॥

आदित्यमुपतिष्ठन्ते नियमादूर्ध्वबाहवः ।
एते परे विशालाक्षि मुनयः संशितव्रताः ॥ १४ ॥
मारुतोद्धूतशिखरैः प्रनृत्त इव पर्वतः ।
पादपैः पुष्पपत्त्राणि सृजद्भिरभितो नदीम् ॥ १५ ॥
निर्धूतान्वायुना पश्य विततान्पुष्पसंचयान् ।
पोप्लूयमानानपरान्पश्य त्वं तनुमध्यमे ॥ १६ ॥
दर्शनं चित्रकूटस्य मन्दाकिन्याश्च शोभने ।
अधिकं पुरवासाच्च मन्ये तव च दर्शनात् ॥ १७ ॥
त्वं पौरजनवद्व्यालानयोध्यामिव पर्वतम् ।
मन्यस्व वनिते नित्यं सरयूवदिमां नदीम् ॥ १८ ॥
लक्ष्मणश्चैव धर्मात्मा मन्निदेशे व्यवस्थितः ।
त्वं चानुकूला वैदेहि प्रीतिं जनयथो मम ॥ १९ ॥
उपस्पृशंस्त्रिषवणं मधुमूलफलाशनः ।
नायोध्यायै न राज्याय स्पृहये च त्वया सह ॥ २० ॥

(स० ९४, ९५.

---

२९ भरतसैन्यदर्शनेन लक्ष्मणसंरम्भः ।

तेषु तत्रोपविष्टेषु भरतस्योपयायिनः ।
सैन्यरेणुश्च शब्दश्च प्रादुरास्तां नभःस्पृशौ ॥ १ ॥
स तं सैन्यसमुद्भूतं श्रुत्वा रामो महास्वनम् ।
उवाच वचनं धीरो लक्ष्मणं दीप्ततेजसम् ॥ २ ॥
हन्त लक्ष्मण पश्येह सुमित्रा सुप्रजास्त्वया ।
भीमस्तनितगम्भीरं तुमुलः श्रूयते स्वनः ॥ ३ ॥ इति
स लक्ष्मणः संत्वरितः सालमारुह्य पुष्पितम् ।
प्रेक्षमाणो दिशः सर्वा इदं वचनमब्रवीत् ॥ ४ ॥
गजाश्वरथसंबाधा यत्तैर्युक्ता पदातिभिः ।
इत एव समायान्ती दृश्यते महती चमूः ॥ ५ ॥

अग्निं संशमयत्वार्यः सीता च भजतां गुहाम् ।
सज्जं कुरुष्व चापं च शरांश्च कवचं तथा ॥ ६ ॥ इति
तं रामः पुरुषव्याघ्रो लक्ष्मणं प्रत्युवाच ह ।
अङ्गावेक्षस्व सौमित्रे कस्येमां मन्यसे चमूम् ॥ ७ ॥
एवमुक्तस्तु रामेण लक्ष्मणो वाक्यमब्रवीत् ।
दिधक्षन्निव तां सेनां रुषितः पावको यथा ॥ ८ ॥
अकण्टकं राज्यमिच्छन् व्यक्तं प्राप्याभिषेचनम् ।
आवां हन्तुं समभ्येति कैकेय्या भरतः सुतः ॥ ९ ॥
*गृहीतधनुषावावां गिरिं वीर श्रयावहे ।
अथ वेहैव तिष्ठावः संनद्धावुद्यतायुधौ ॥ १० ॥
अपि द्रक्ष्यामि भरतं यत्कृते व्यसनं महत् ।
त्वया राघव संप्राप्तं सीतया च मया तथा ॥ ११ ॥
भरतस्य वधे दोषं नाहं पश्यामि राघव ।
पूर्वापकारिणं हत्वा न ह्यधर्मेण युज्यते ॥ १२ ॥
एतस्मिन्निहते कृत्स्नामनुशाधि वसुंधराम् ।
कलुषेणाद्य महता मेदिनी परिमुच्यताम् ॥ १३ ॥
अद्येमं संयतं क्रोधमसत्कारं च मानद ।
मोक्ष्यामि शत्रुसैन्येषु कक्षेष्विव हुताशनम् ॥ १४ ॥
अद्यैव चित्रकूटस्य काननं निशितैः शरैः ।
छिन्दञ्शत्रुशरीराणि करिष्ये शोणितोक्षितम् ॥ १५ ॥
शराणां धनुषश्चाहमनृणोऽस्मिन्महावने ।
ससैन्यं भरतं हत्वा भविष्यामि न संशयः ॥ १६ ॥
(स० ९६.)

---

३० रामकृतं लक्ष्मणपरिसान्त्वनम् ।

रामः— किमत्र धनुषा कार्यमासिना वा सचर्मणा ।
महाबले महोत्साहे भरते स्वयमागते ॥ १ ॥

पितुः सत्यं प्रतिश्रुत्य हत्वा भरतमाहवे ।
किं करिष्यामि राज्येन सापवादेन लक्ष्मण ॥ २ ॥
यद्द्रव्यं बान्धवानां वा मित्राणां वा क्षये भवेत् ।
नाहं तत्प्रतिगृह्णीयां भक्ष्यान्विषकृतानिव ॥ ३ ॥
धर्ममर्थं च कामं च पृथिवीं चापि लक्ष्मण ।
इच्छामि भवतामर्थे एतत्प्रतिशृणोमि ते ॥ ४ ॥
भ्रातॄणां संग्रहार्थं च सुखार्थं चापि लक्ष्मण ।
राज्यमप्यहमिच्छामि सत्येनायुधमालभे ॥ ५ ॥
नेयं मम मही सौम्य दुर्लभा सागराम्बरा ।
न हीच्छेयमधर्मेण शक्रत्वमपि लक्ष्मण ॥ ६ ॥
यद्विना भरतं त्वां च शत्रुघ्नं वापि मानद ।
भवेन्मम सुखं किंचिद्भस्म तत्कुरुतां शिखी ॥ ७ ।
स्नेहेनाक्रान्तहृदयः शोकेनाकुलितेन्द्रियः ।
द्रष्टुमभ्यागतो ह्येष भरतो नान्यथागतः ॥ ८ ॥
विप्रियं कृतपूर्वं ते भरतेन कदा नु किम् ।
अस्मासु मनसाप्येष नाहितं किंचिदाचरेत् ॥ ९ ॥
न हि ते निष्ठुरं वाच्यो भरतो नाप्रियं वचः ।
अहं ह्यप्रियमुक्तः स्यां भरतस्याप्रिये कृते ॥ १० ॥
कथं नु पुत्राः पितरं हन्युः कस्यांचिदापदि ।
भ्राता वा भ्रातरं हन्यात्सौमित्रे प्राणमात्मनः ॥ ११ ॥
यदि राज्यस्य हेतोस्त्वमिमां वाचं प्रभाषसे ।
वक्ष्यामि भरतं दृष्ट्वा राज्यमस्मै प्रदीयताम् ॥ १२ ॥
उच्यमानो हि भरतो मया लक्ष्मण तद्वचः ।
राज्यमस्मै प्रयच्छेति बाढमित्येव मंस्यते ॥ १३ ॥
तथोक्तो धर्मशीलेन भ्रात्रा तस्य हिते रतः
लक्ष्मणः प्रविवेशेव स्वानि गात्राणि लज्जया ॥ १४ ॥

(स० ९७.)

३१ रामभरतसमागमः ।

एवं स विलपंस्तस्मिन्वने दशरथात्मजः ।
ददर्श महतीं पुण्यां पर्णशालां मनोरमाम् ॥ १॥
निरीक्ष्य स मुहूर्तं तु ददर्श भरतो गुरुन् ।
उटजे राममासीनं जटामण्डलधारिणम् ॥ २ ॥
सिंहस्कन्धं महाबाहुं पुण्डरीकनिभेक्षणम् ।
दृष्ट्वैव विललापार्तो बाष्पसंदिग्धया गिरा ॥ ३ ॥
यः संसदि प्रकृतिभिर्भवेद्युक्त उपासितुम् ।
वन्यैर्मृगैरुपासीनः सोऽयमास्ते ममाग्रजः ॥ ४ ॥
अधारयद्यो विविधाश्चित्राः सुमनसः सदा ।
सोऽयं जटाभारामिमं सहते राघवः कथम् ॥ ५॥
यस्य यज्ञैर्यथादिष्टैर्युक्तो धर्मस्य संचयः ।
शरीरक्लेशसंभूतं स धर्मं परिमार्गते* ॥ ६ ॥
चन्दनेन महार्हेण यस्याङ्गमुपसेवितम् ।
मलेन तस्याङ्गमिदं कथमार्यस्य सेव्यते ॥ ७ ॥
मन्निमित्तमिदं दुःखं प्राप्तो रामः सुखोचितः ।
धिग्जीवितं नृशंसस्य मम लोकविगर्हितम् ॥ ८ ॥
इत्येवं विलपन्दीनः प्रस्विन्नमुखपङ्कजः ।
पादावप्राप्य रामस्य पपात भरतो रुदन् ॥ ९ ॥
बाष्पैः पिहितकण्ठश्च प्रेक्ष्य रामं यशस्विनम् ।
आर्येत्येवाभिसंक्रुश्य व्याहर्तुं नाशकत्ततः ॥ १० ॥
कथंचिदभिविज्ञाय विवर्णवदनं कृशम् ।
भ्रातरं भरतं रामः परिजग्राह पाणिना ॥ ११ ॥
आघ्राय रामस्तं मूर्ध्नि परिष्वज्य च राघवम् ।
अङ्के भरतमारोप्य पर्यपृच्छत्समाहितः ॥ १२ ॥
क्व नु तेऽभूत्पिता तात यदरण्यं त्वमागतः ।
न हि त्वं जीवतस्तस्य वनमागन्तुमर्हसि ॥ १३ ॥

कच्चिद्दशरथो राजा कुशली सत्यसंगरः ।
कच्चित्सौम्य न ते राज्य भ्रष्टं बालस्य शाश्वतम् ॥ १४ ॥
यन्निमित्तामिमं देशं कृष्णाजिनजटाधरः ।
हित्वा राज्यं प्रविष्टस्त्वं तत्सर्वं वक्तुमर्हसि ॥ १५ ॥
(स० ९९, १००, १०१.)

---

३२ राज्यस्वीकारनिर्बन्धः ।

इत्युक्तः कैकयीपुत्रः काकुत्स्थेन महात्मना ।
शोकं निगृह्य बलवत्प्राञ्जलिर्वाक्यमब्रवीत् ॥ १ ॥
आर्य तातः परित्यज्य कृत्वा कर्म सुदुष्करम् ।
गतः स्वर्गं महाबाहुः पुत्रशोकाभिपीडितः ॥ २ ॥
त्वामेव शोचंस्तव दर्शनेप्सुस्त्वय्येव सक्तामनिवर्त्य बुद्धिम् ।
त्वया विहीनस्तव शोकरुग्णस्त्वां संस्मरन्नेव गतः पिता ते ॥ ३ ॥
प्रोषिते मयि यत्पापं मात्रा मत्कारणात्कृतम् ।
क्षुद्रया तदनिष्टं मे प्रसीदतु भवान्मम ॥ ४ ॥
सा राज्यफलमप्राप्य विधवा शोककर्शिता ।
पतिष्यति महाघोरे नरके जननी मम ॥ ५ ॥
धर्मबन्धेन बद्धोऽस्मि तेनेमां नेह मातरम् ।
हन्मि तीव्रेण दण्डेन दण्डार्हां पापकारिणीम् ॥ ६ ॥
गुरुः क्रियावान्वृद्धश्च राजा प्रेतः पितेति च ।
तातं न परिगर्हेऽहं दैवतं चेति संसदि ॥ ७ ॥
को हि धर्मार्थयोर्हीनमीदृशं कर्म किल्बिषम् ।
स्त्रियाः प्रियचिकीर्षुः सन्कुर्याद्धर्मज्ञ धर्मवित् ॥ ८ ॥
अन्तकाले हि भूतानि मुह्यन्तीति पुरा श्रुतिः ।
राज्ञैवं कुर्वता लोके प्रत्यक्षा सा श्रुतिः कृता ॥ ९ ॥
साध्वर्थमभिसंधाय क्रोधान्मोहाच्च साहसात् ।
तातस्य यदतिक्रान्तं प्रत्याहरतु तद्भवान् ॥ १० ॥

क्व चारण्यं क्व च क्षात्रं क्व जटाः क्व च पालनम् ।
ईदृशं व्याहतं कर्म न भवान्कर्तुमर्हति ॥ ११ ॥
एष हि प्रथमो धर्मः क्षत्रियस्याभिषेचनम् ।
येन शक्यं महाप्राज्ञ प्रजानां परिपालनम् ॥ १२ ॥
अथ क्लेशजमेव त्वं धर्मं चरितुमिच्छसि ।
धर्मेण चतुरो वर्णान्पालयन्क्लेशमाप्नुहि ॥ १३ ॥
श्रुतेन बालः स्थानेन जन्मना भवतो ह्यहम् ।
स कथं पालयिष्यामि भूमिं भवति तिष्ठति ॥ १४ ॥
शाश्वतोऽयं सदा धर्मः स्थितोऽस्मासु नरर्षभ ।
ज्येष्ठे पुत्रे स्थिते राजन्न कनीयान्भवेन्नृपः ॥ १५ ॥
स समृद्धां मया सार्धमयोध्यां गच्छ राघव ।
अभिषेचय चात्मानं कुलस्यास्य भवाय नः ॥ १६ ॥
भवत्वविधवा भूमिः समग्रा *पतिना त्वया ।
शशिना विमलेनेव शारदी रजनी यथा ॥ १७ ॥
एभिश्च सचिवैः सार्धं शिरसा याचितो मया ।
भ्रातुः शिष्यस्य दासस्य प्रसादं कर्तुमर्हसि ॥ १८ ॥
आक्रोशं मम मातुश्च प्रमृज्य पुरुषर्षभ ।
अद्य तत्रभवन्तं च पितरं रक्ष किल्बिषात् ॥ १९ ॥
एवमुक्त्वा महाबाहुः सबाष्पः कैकयीसुतः ।
रामस्य शिरसा पादौ जग्राह भरतः पुनः ॥ २० ॥

तथाभिरामो भरतेन ताम्यता प्रसाद्यमानः शिरसा महीपतिः ।
न चैव चक्रे गमनाय सत्त्ववान्मतिं पितुस्तद्वचने प्रतिष्ठितः ॥ २१ ॥
तदद्भुतं स्थैर्यमवेक्ष्य राघवे समं जनो हर्षमवाप दुःखितः ।
न यात्ययोध्यामिति दुःखितोऽभवात्स्थिरप्रतिज्ञत्वमवेक्ष्य हर्षितः ॥ २२ ॥

(स० १०१, १०२, १०६.)

---

३३ भरतवचनानङ्गीकारः ।

तं मत्तमिव मातङ्गं निःश्वसन्तं पुनः पुनः ।
भ्रातरं भरतं रामः परिष्वज्येदमब्रवीत् ॥ १ ॥
कुलीनः सत्त्वसंपन्नस्तेजस्वी चरितव्रतः ।
राज्यहेतोः कथं पापमाचरेन्मद्विधो जनः ॥ २ ॥
न दोषं त्वयि पश्यामि सूक्ष्ममप्यरिसूदन ।
न चापि जननीं बाल्यात्त्वं विगर्हितुमर्हसि ॥ ३ ॥
एताभ्यां धर्मशीलाभ्यां वनं गच्छेति राघव ।
मातापितृभ्यामुक्तोऽहं कथमन्यत्समाचरे* ॥ ४ ॥
त्वया राज्यमयोध्यायां प्राप्तव्यं लोकसत्कृतम् ।
वस्तव्यं दण्डकारण्ये मया वल्कलवाससा ॥ ५ ॥
एवमुक्त्वा महाराजो विभागं लोकसंनिधौ ।
धर्मात्मा नः पिता तात स्वर्गतः सत्कृतः सताम् ॥ ६ ॥
न मया शासनं तस्य त्यक्तुं न्याय्यमरिंदम ।
स त्वयापि सदा मान्यः स वै बन्धुः स नः पिता ॥ ७ ॥
धार्मिकेणानृशंसेन नरेण गुरुवर्तिना ।
भवितव्यं नरव्याघ्र परलोकं जिगीषता ॥ ८ ॥
लक्ष्मीश्चन्द्रादपेयाद्वा हिमवान्वा हिमं त्यजेत् ।
अतीयात्सागरो वेलां न प्रतिज्ञामहं पितुः ॥ ९ ॥
अयोध्यां गच्छ भरत प्रकृतीरुपरञ्जय ।
मातरं रक्ष कैकेयीं मा रोषं कुरु तां प्रति ॥ १० ॥
त्वं राजा भरत भव स्वयं नराणां वन्यानामहमपि राजराण्मृगाणाम् ॥
गच्छ त्वं पुरवरमद्य संप्रहृष्टः संहृष्टस्त्वहमपि दण्डकान्प्रवेक्ष्ये* ॥ ११ ॥
छायां ते दिनकरभाः प्रबाधमानं वर्षत्रं भरत करोतु मूर्ध्नि शीताम् ॥
एतेषामहमपि काननद्रुमाणां छायां तामतिशयिनीं शनैः श्रयिष्ये ॥ १२ ॥

शत्रुघ्नस्त्वतुलमतिस्तु ते सहायः सौमित्रिर्मम विदितः प्रधानमित्रम् ॥
चत्वारस्तनयवरा वयं नरेन्द्रं सत्यस्थं भरत चराम मा विषीद ॥ १३ ॥

(स० १०१, १०५, १०७, ११२.)

---

३४ जाबालेर्वचनम् ।

आश्वासयन्तं भरतं जाबालिर्ब्राह्मणोत्तमः ।
उवाच रामं धर्मज्ञं धर्मापेतमिदं वचः ॥ १ ॥
साधु राघव मा भूत्ते बुद्धिरेवं निरर्थिका ।
प्राकृतस्य नरस्येव ह्यार्यबुद्धेस्तपस्विनः ॥ २ ॥
कः कस्य पुरुषो बन्धुः किमाप्यं कस्य केनचित् ।
एको हि जायते जन्तुरेक एव विनश्यति ॥ ३ ॥
तस्मान्माता पिता चेति राम सज्जेत* यो नरः ।
उन्मत्त इव स ज्ञेयो नास्ति कश्चिद्धि कस्यचित् ॥ ४ ॥
यथा ग्रामान्तरं गच्छन्नरः कश्चिद्बहिर्वसेत् ।
उत्सृज्य च तमावासं प्रतिष्ठेतापरेऽहनि ॥ ५ ॥
एवमेव मनुष्याणां पिता माता गृहं वसु ।
आवासमात्रं काकुत्स्थ सज्जन्ते*नात्र सज्जनाः ॥ ६ ॥
पित्र्यं राज्यं समुत्सृज्य स नार्हसि नरोत्तम ।
आस्थातुं कापथं दुःखं विषमं बहुकण्टकम् ॥ ७ ॥
राजभोगाननुभवन्महार्हान्पार्थिवात्मज ।
विहर त्वमयोध्यायां यथा शक्रस्त्रिविष्टपे ॥ ८ ॥
न ते कश्चिद्दशरथस्त्वं च तस्य न कश्चन ।
अन्यो राजा त्वमन्यस्तु तस्मात्कुरु यदुच्यते ॥ ९ ॥
गतः स नृपतिस्तत्र गन्तव्यं यत्र तेन वै ।
प्रवृत्तिरेषा भूतानां त्वं तु मिथ्या विहन्यसे ॥ १० ॥
अर्थे धर्मपरा ये ये तांस्ताञ्शोचामि नेतरान् ।
ते हि दुःखमिह प्राप्य विनाशं प्रेत्य लेभिरे ॥ ११ ॥

अष्टकापितृदैवत्यमित्ययं प्रसृतो जनः ।
अन्नस्योपद्रवं पश्य मृतो हि किमशिष्यति ॥ १२ ॥
यदि भुक्तमिहान्येन देहमन्यस्य गच्छति ।
दद्यात्प्रवसतां श्राद्धं न तत्पथ्यशनं भवेत् ॥ १३ ॥
दानसंवनना ह्येते ग्रन्था मेधाविभिः कृताः ।
यजस्व देहि दीक्षस्व तपस्तप्यस्व संत्यज ॥ १४ ॥
स नास्ति परमित्येतत्कुरु बुद्धिं महामते ।
प्रत्यक्षं यत्तदातिष्ठ परोक्षं पृष्ठतः कुरु ॥ १५ ॥
सतां बुद्धिं पुरस्कृत्य सर्वलोकनिदर्शिनीम् ।
राज्यं स त्वं निगृह्णीष्व भरतेन प्रसादितः ॥ १६ ॥

(स० १०८.)

---

३५ जाबालिमतगर्हणम् ।

जाबालेस्तु वचः श्रुत्वा रामः सत्यपराक्रमः ।
उवाच परया सूक्त्या बुद्ध्या विप्रतिपन्नया ॥ १ ॥
भवान्मे प्रियकामार्थं वचनं यदिहोक्तवान् ।
अकार्यं कार्यसंकाशमपथ्यं पथ्यसंनिभम् ॥ २ ॥
कुलीनमकुलीनं वा वीरं पुरुषमानिनम् ।
चारित्रमेव व्याख्याति शुचिं वा यदि वाशुचिम् ॥ ३ ॥
अधर्मं धर्मवेषेण यद्यहं लोकसंकरम् ।
अभिपत्स्ये शुभं हित्वा क्रियां विधिविवर्जिताम् ॥ ४ ॥
कश्चेतयानः* पुरुषः कार्याकार्यविचक्षणः ।
बहु मन्येत मां लोके दुर्वृत्तं लोकदूषणम् ॥ ५ ॥
यद्वृत्ताः सन्ति राजानस्तद्वृत्ताः सन्ति हि प्रजाः ।
सत्यमेवानृशंसं च राजवृत्तं सनातनम् ॥ ६॥
ऋषयश्चैव देवाश्च सत्यमेव हि मेनिरे ।
सत्यवादी हि लोकेऽस्मिन्परं गच्छति चाक्षयम् ॥ ७ ॥

उद्विजन्ते यथा सर्पान्नरादनृतवादिनः ।
धर्मः सत्यपरो लोके मूलं सर्वस्य चोच्यते ॥ ८ ॥
सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः ।
सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥ ९ ॥
नैव मोहान्न लोभाद्वा न चाज्ञानात्तमोऽन्वितः ।
सेतुं सत्यस्य भेत्स्यामि गुरोः सत्यप्रतिश्रवः ॥ १० ॥
स्थिरा मया प्रतिज्ञाता प्रतिज्ञा गुरुसंनिधौ ।
प्रहृष्टमानसा देवी कैकेयी चाभवत्तदा ॥ ११ ॥
सोऽहं कथं प्रतिज्ञाय वनवासमिमं गुरोः ।
भरतस्य करिष्यामि वचो हित्वा गुरोर्वचः ॥ १२ ॥
वनवासं वसन्नेव शुचिर्नियतभोजनः ।
मूलपुष्पफलैः पुण्यैः पितॄन्देवांश्च तर्पयन् ॥ १३ ॥
संतुष्टपञ्चवर्गोऽहं लोकयात्रां प्रवाहये ।
अकुहः श्रद्दधानः सन्कार्याकार्यविचक्षणः ॥ १४ ॥
निन्दाम्यहं कर्म कृतं पितुस्तद्यस्त्वामगृह्णाद्विषमस्थबुद्धिम् ।
बुद्ध्यानयैवंविधया चरन्तं सुनास्तिकं धर्मपथादपेतम् ॥ १५ ॥
इति ब्रुवन्तं वचनं सदोषं रामं महात्मानमदीनसत्त्वम् ।
उवाच पथ्यं पुनरास्तिकं च सत्यं वचः सानुनयं स विप्रः ॥ १६ ॥
न नास्तिकानां वचनं ब्रवीम्यहं न नास्तिकोऽस्मीति च संप्रधार्यताम् ।
निवर्तनार्थं तव राम कारणात्प्रसादनार्थं च मयैतदीरितम् ॥ १७ ॥
(स० १०९)

---

३६ निरानन्दायामयोध्यायां भरतस्य प्रवेशः ।

स्निग्धगम्भीरघोषेण स्यन्दनेनोपयान्प्रभुः ।
अयोध्यां भरतः क्षिप्रं प्रविवेश महायशाः ॥ १ ॥
बिडालोलूकचरितामालीननरवारणाम् ।
तिमिराभ्याहतां कालीमप्रकाशां निशामिव ॥ २ ॥

अल्पोष्णक्षुब्धसलिलां घर्मतप्तविहंगमाम् ।
लीनमीनझषग्राहां कृशां गिरिनदीमिव ॥ ३ ॥
विध्वस्तकवचां रुग्णगजवाजिरथध्वजाम् ।
हतप्रवीरामापन्नां चमूमिव महाहवे ॥ ४ ॥
सफेनां सस्वनां भूत्वा सागरस्य समुत्थिताम् ।
प्रशान्तमारुतोद्धूतां जलोर्मिमिव निःस्वनाम् ॥ ५ ॥
प्रभाकराद्यैः सुस्निग्धैः प्रज्वलद्भिरिवोत्तमैः ।
वियुक्तां मणिभिर्जात्यैर्नवां मुक्तावलीमिव ॥ ६ ॥
सहसा चलितां स्थानान्महीं पुण्यक्षयाद्गताम् ।
संहृतद्युतिविस्तारां तारामिव दिवश्च्युताम् ॥ ७ ॥
पुष्पनद्धां वसन्तान्ते मत्तभ्रमरशालिनीम् ।
द्रुतदावाग्निविप्लुष्टां क्लान्तां वनलतामिव ॥ ८ ॥
संमूढनिगमां सर्वां संक्षिप्तविपणापणाम् ।
प्रच्छन्नशशिनक्षत्रां द्यामिवाम्बुधरैर्युताम् ॥ ९ ॥
क्षीणपानोत्तमैर्भग्नैः शरावैरभिसंवृताम् ।
हतशौण्डामिव ध्वस्तां पानभूमिमसंस्कृताम् ॥ १० ॥
वृक्णभूमितलां निम्नां वृक्णपात्रैः समावृताम् ।
उपयुक्तोदकां भग्नां प्रपां निपतितामिव ॥ ११ ॥
विपुलां विततां चैव युक्तपाशां तरस्विनाम् ।
भूमौ बाणैर्विनिकृत्तां पतितां ज्यामिवायुधात् ॥ १२ ॥
सहसा युद्धशौण्डेन हयारोहेण वाहिताम् ।
निहतां प्रतिसैन्येन वडवामिव पातिताम् ॥ १३ ॥
भरतस्तु रथस्थः सञ्श्रीमान्दशरथात्मजः ।
वाहयन्तं रथश्रेष्ठं सारथिं वाक्यमब्रवीत् ॥ १४ ॥
किं नु खल्वद्य गम्भीरो मूर्छितो न निशाम्यते ।
यथापुरमयोध्यायां गीतवादित्रनिस्वनः ॥ १५ ॥

वारुणीमदगन्धश्च माल्यगन्धश्च मूर्छितः ।
चन्दनागुरुगन्धश्च न प्रवाति समन्ततः ॥ १६ ॥
यानप्रवरघोषश्च सुस्निग्धहयनिस्वनः ।
नेदानीं श्रूयते पुर्यामस्यां रामे विवासिते ॥ १७ ॥
बहिर्यात्रां न गच्छन्ति चित्रमाल्यधरा नराः ।
नोत्सवाः संप्रवर्तन्ते रामशोकार्दिते पुरे ॥ १८ ॥
सा हि नूनं मम भ्रात्रा पुरस्यास्य द्युतिर्गता ।
न हि राजत्ययोध्येयं सासारेवार्जुनी क्षपा ॥ १९ ॥
कदा नु खलु मे भ्राता महोत्सव इवागतः ।
जनयिष्यत्योध्यायां हर्षं ग्रीष्म इवाम्बुदः ॥ २० ॥
तरुणैश्चारुवेषैश्च नरैरुन्नतगामिभिः ।
संपतद्भिरयोध्यायां नाभिभान्ति महापथाः ॥२१ ॥
इति ब्रुवन्सारथिना दुःखितो भरतस्तदा ।
अयोध्यां संप्रविश्यैव विवेश वसतिं पितुः ॥ २२ ॥
तदा तदन्तःपुरमुज्झितप्रभं सुरैरिवोत्कृष्टमभास्करं दिनम् ।
निरीक्ष्य सर्वत्र विविक्तमात्मवान्मुमोच बाष्पं भरतः सुदुःखितः ॥ २३ ॥

(स० ११४)

---

३७ अनसूयानुग्रहः

शिथिलां वलितां वृद्धां जरापाण्डुरमूर्धजाम् ।
सततं वेपमानाङ्गीं प्रवाते कदलीमिव ॥ १ ॥
तां तु सीता महाभागामनसूयां पतिव्रताम् ।
अभ्यवादयदव्यग्रा स्वं नाम समुदाहरत् ॥ २ ॥
अभिवाद्य च वैदेही तापसीं तां दमान्विताम् ।
बद्धाञ्जलिपुटा हृष्टा पर्यपृच्छदनामयम् ॥ ३ ॥
ततः सीतां महाभागां दृष्ट्वा तां धर्मचारिणीम् ।
सान्त्वयन्त्यब्रवीद्वृद्धा दिष्ट्या धर्ममवेक्षसे ॥ ४ ॥

त्यक्त्वा ज्ञातिजनं सीते मानवृद्धिं च मानिनि ।
अवरुद्धं वने रामं दिष्ट्या त्वमनुगच्छसि ॥ ५ ॥
नगरस्थो वनस्थो वा शुभो वा यदि वाशुभः ।
यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः ॥ ६ ॥
दुःशीलः कामवृत्तो वा धनैर्वा परिवर्जितः ।
स्त्रीणामार्यस्वभावानां परमं दैवतं पतिः ॥ ७ ॥
नातो विशिष्टं पश्यामि बान्धवं विमृशन्त्यहम् ।
सर्वत्रयोग्यं वैदेहि तपः कृतमिवाव्ययम् ॥ ८ ॥
न त्वेवमनुगच्छन्ति गुणदोषमसत्स्त्रियः ।
कामवक्तव्यहृदया भर्तृनाथाश्चरन्ति याः ॥ ९ ॥
प्राप्नुवन्त्ययशश्चैव धर्मभ्रंशं च मैथिलि ।
अकार्यवशमापन्नाः स्त्रियो याः खलु तद्विधाः ॥१० ॥
त्वद्विधास्तु गुणैर्युक्ता दृष्टलोकपरावराः ।
स्त्रियः स्वर्गे चरिष्यन्ति यथा पुण्यकृतस्तथा ॥ ११ ॥
तदेवमेतं त्वमनुव्रता सती पतिप्रधाना समयानुवर्तिनी ।
भव स्वभर्तुः सहधर्मचारिणी यशश्च धर्मं च ततः समाप्स्यसि ॥१२॥
सा त्वेवमुक्ता वैदेही त्वनसूयानसूयया ।
प्रतिपूज्य वचो मन्दं प्रवक्तुमुपचक्रमे ॥ १३ ॥
नैतदाश्चर्यमार्यायां यन्मां त्वमनुभाषसे ।
विदितं तु ममाप्येतद्यथा नार्याः पतिर्गुरुः ॥ १४ ॥
यद्यप्येष भवेद्भर्ता अनार्यो वृत्तिवर्जितः ।
अद्वैधमत्र *वर्तव्यं तथाप्येष मया भवेत् ॥ १५ ॥
किं पुनर्यो गुणश्लाघ्यः सानुक्रोशो जितेन्द्रियः ।
स्थिरानुरागो धर्मात्मा मातृवत्पितृवत्प्रियः ॥१६ ॥
यां वृत्तिं वर्तते रामः कौसल्यायां महाबलः ।
तामेव नृपनारीणामन्यासामपि वर्तते ॥ १७ ॥

आगच्छन्त्याश्च विजनं वनमेवं भयावहम् ।
समाहितं हि मे श्वश्वा हृदये यत्स्थिरं मम ॥ १८ ॥
पाणिप्रदानकाले च यत्पुरा त्वग्निसंनिधौ ।
अनुशिष्टं जनन्या मे वाक्यं तदपि मे धृतम् ॥ १९ ॥
पतिशुश्रूषणान्नार्यास्तपो नान्यद्विधीयते ।
रोहिणी न विना चन्द्रं मुहूर्तमपि दृश्यते ॥ २० ॥ इति
ततोऽनसूया संहृष्टा श्रुत्वोक्तं सीतया वचः ।
शिरस्याघ्राय चोवाच मैथिलीं हर्षयन्त्युत ॥ २१ ॥
नियमैर्विविधैराप्तं तपो हि महदस्ति मे ।
तत्संश्रित्य बलं सीते छन्दये त्वां शुचिव्रते ॥ २२ ॥
इदं दिव्यं वरं माल्यं वस्त्रमाभरणानि च ।
अङ्गरागं च वैदेहि महार्हमनुलेपनम् ॥ २३ ॥
मया दत्तमिदं सीते तव गात्राणि शोभयेत् ।
अनुरूपमसंक्लिष्टं नित्यमेव भविष्यति ॥ २४ ॥
अङ्गरागेण दिव्येन लिप्ताङ्गी जनकात्मजे ।
शोभयिष्यसि भर्तारं यथा श्रीर्विष्णुमव्ययम् ॥ २५ ॥ इति
सा वस्त्रमङ्गरागं च भूषणानि स्रजस्तथा ।
मैथिली प्रतिजग्राह प्रीतिदानमनुत्तमम् ॥ २६ ॥

(स० ११७, ११८.)

NOTES

ON

रामायणकथासंदोह.

I Stanza. 1 उदीर्ण, powerful. सः refers to राम. 2 निभृत, unassuming, modest. संयमः, with-holding the hand. 3 ततः क्षात्त्रधर्माचरणात्. 4 आत्मवत्, self-controlled. 5 विनयः, breaking in. 6 नयः, leading, a rule. 7 सारः, merit, worth.

II. 4 अनु-मन् caus. to take the consent of. 5 अनु-जन् to be born of.

III. 4 कृतशोभिन् (qualifying चित्तम्), कृतेन शोभते, सुखमधिगच्छति, does not like to reveal any undertaking before its completion. 5 श्वोभाविन्यभिषेचने (loc. abs.), on the eve of the coronation. 9 जातः for जनितः.

IV. 1 ज्ञातिदासी, ज्ञातेः (relations by birth) दासी, a maid-servant given by her mother. 5 अनर्थक meaningless. अर्थः, पुत्राभिषेकरूपः. 12 परि-हा to debar or exclude. 14 वैरं यापय् to visit the consequences of the enmity upon. 16 दैवासुर, (adj. from देवासुर) देवासुराः सन्ति प्रतिद्वन्द्वित्वेन यस्मिन् तत्. 17 कृतमूल, firmly established. 18 अन्तर्हित covered.

V. अभियुक्त–offended. 4 प्रतिज्ञां प्रति-ज्ञा to plight one's word. 6 तेन रामेण...क्रियाम् by that R. I solemnly promise to you the execution of your bidding. 8 निक्षेपौ...अहम् I demand those boons lying as a deposit with you so long. 9 अकण्टक, without any rival. 14 ग्रह्, to please. 16 समयः a promise. 17 अनर्थ...उपदेशिता, who represented to you, as wholesome, this injurious demand ; शीलव्यसनम् depra-

vity of character. पुरा जानामि, अजानाम् (or also ज्ञास्यामि). 18 अपावृत्ता, retracted. 24 कारयिष्यसि for करिष्यसि. 25 नालं... भाषितुम् he will never remonstrate with me on the propriety or otherwise of my words, but will forthwith act upto them. 26 बाढम् (adv.) yes, construe. रामः प्रतिकूलं कुर्यात् चेत् तन्मे प्रियं स्यात्, किन्तु रामस्तन्न करिष्यति. 30 कषाय astringent; तिक्त, *bitter*; कटु, *pungent*; things–which constitute the forest diet, or वन्य आहार; वर्तयिष्यति, caus. for primitive. 31 उचित, accustomed to. 32 व्यसनप्रहारिन्—attacking one on the weak point. प्रसह्य relentlessly.

VI. 1 रजनिम् accus. for locative. 4 रजनिम् for accus.e of duration. 6 सुप्रजस् having a son fortunat enough to become the heir-apparent. 8 पश्यन्ती &c. Seeing you installed on the throne after passing through the procession. एवं...प्रियाम् a parenthetical sentence. 13 आप्लुत eclipsed. उत्क्रान्त &c. Note the proverbial keen conscience of a sage. 18 supply तथा त्वयाचरितव्यम्. 19 त्वयि तन्न विपत्स्यते will not remain unfulfilled by you. 20 रामो &c. observe how just, though proud, were राम's professions of his attachment to truth. 23 न going with both, प्रविवेश & प्रविव्यथे. 28 आवृत् caus. to bring back. 26 दण्डकः a bandit. These दण्डकs, it seems, gave their name to the vast forest (of दण्डकारण्य) they inhabited.

VII. 3 संतापः, *grief*. 4 निगृहीत humiliated or oppressed. 6 चिरात्. for ever. विप्रकारः, persecution. 7 योगः, meditation upon the deity. दुर्गत, unfortunate. स्थिर, hard, callous. 8 क्षयः (from क्षि. 6 p. to dwell.) क्षियन्तिजनाः यस्मिन् सः, residence. 11 प्रधर्षित, overpowered. विषयः, a worldly pleasure. चोद्यमान, pressed or compelled. 13 राजवृत्तम् the conduct of kings in the past. 14 आत्मस्थं कृ, to usurp or appropriate. 15 विप्रिये स्था to enter into hostility, to oppose. 17 उत्पथम् (ind). पथोऽभावः, no road, a wrong path. 21 लालस, overpowered, uneasy. 22 प्रायम् आस् to sit still for fasting oneself to death. 24 नियोगे गुरुः having the authority to order.

VIII. 1 धारयन् सत्त्वम्, inspiring him with a spirit of tolerance. 2 धैर्यम् patience. 3 अव्यग्रम्, without the least anxiety. 4 कृतान्तः destiny. प्रतिपत्तिः, f. tendency. वेदनम् for परिवेदनम् disinheritance, depriving one of due rights for the benefit of a junior. 6 यस्य—न विद्यते, the very existence, or working, of which is to be inferred *retrospectively* only from the acts. 7 मन्युः, anger. 8 आरम्भैः आरब्धम् what one is executing with efforts. 9 विपर्ययः change of hands. 10 ते for, त्वयि (1st half.) and for त्वया (2nd). 11 संभावितात्मानः (संभावितः wellknown, आत्मा courage येषां ते) known for their courage. 13 दैवेन विपन्नार्थः नावसीदति, has no cause for grief on account of his undertaking being frustrated by fate, i. e. fate never defeats his object and he never comes to grief on that score. 14 व्यक्ति f. revelation. (of their comparative strengths) 16 स्तम्भहेतुः a cause of hindrance, (to the free movements. of the limbs of the body), a useless appendage, 17 समर्थित resolved upon. 18 अद्य... प्रभविष्यति. to-day will prevail the power of my skill in the use of arms. अप्रभुतां कृ to deprive one of royalty. 19 चन्दनसारः excellent sandal. आमोक्षणम् wearing or putting on. विमोक्षः gift, use for charitable purposes.

IX. 1 उञ्छः कणश आदानं, gleaning grains of corn dropped down in a field after the harvest has been gathered. वर्तयेत्, as also वर्तयिष्यति (4), caus. for prim. 7 निर्नमस्कारा, not bowing to gods. 8 कालो दुरत्ययः fate cannot be overcome. 9 एकाग्र with the mind at ease. आनृण्यता, a rare instance of a double abstract noun like modern दास्यत्वं 17 आगमः a path. 18 प्रार्थयान. for प्रार्थयमान, trying to acquire.

X (I). 1 तपस्विनी (a term of compassion) a poor woman. 3 वल्गु, charming. 6 नृपोद्यते for नृपोद्यमिते, got ready by the king. प्रचोदितः...निर्जितः तया, she demanded the execution of the promise which she had (already) duly secured. 8 कल्यम्, (accus. for loc.) early morning. 11 लघुतया &c. based on the assumption of meanness in me. 14 विविधाश्रयम् (adv.) on various matters. 15 चिन्तयन्ती पतिव्रतम्, पतिः

(पतिसेवा) एव व्रतम्—Looking upon attendance on her husband as a religious vow. अव्यग्र, with a contented mind.

(II). प्रसक्ताश्रुमुखी, with tears trickling down her face. 2 वस्तव्यता, residence. तव स्नेहपुरस्कृता, favoured with affection by you. 4 कुश &c. kinds of grass. 5 Note the absence of संधि between the first two quarters. 9 किं कृत्वा, on what score. 10 अनुव्रत, firmly devoted. 11 अवरुध्यसे, you are prevented (from wearing the crown). 12 प्रेत्यभाव: life after death, i. e. in the next world. 15 अव-कॄ, to cover or besmear. 16 य: refers to वास: (residence) understood. 17 गुरुता, burden, inconvenience. 18 आयस्त, troubled. सस्वरम् goes with चुक्रोश. 19 सिता, the full moon night. 20 परि-वि-श्वस् caus. to comfort or cheer up. 22 तव. goes with अभिप्रायं & वासम्. रुच् caus. to like, approve of. 23 अनुक्रम् to undertake.

XI. 1 गज-आयुतम्. 7 उपजीविन् lying under her sway, she owns a thousand villages as her private property 8 पिटिका, a wicker-basket. 9 सर्वम् cf. जातौ एकवचनम्, दृष्ट्वा governs रामम् (understood). 15 सत्त्व: an evil spirit. जित, won, conciliated. येन qualifies पथा (understood). 22 मुहूर्तस्य for मुहूर्तात्. बाष्प &c. adj. to महीपतिम्. 23 दण्डकारण्यम् governed by प्रति (understood), कुशलम् benevolence. 24 नि-ग्रह्, to imprison. 25 प्रतिज्ञान्ते after the fulfilment of the promise. 27 अरिष्टम् safely. रिष्टम् meaning injury. अकुतोभयः अविद्यमानं कुतोऽपि भयं यस्मिन् सः. 29 शिवासु सीमासु, a locative absolute phrase.

XII. कटकटाय् (an onomatopoetic root) to gnash. 3 कोटि f. one side of a question, consideration. 4 तम् qualifies आचारम् (understood). 8 जृम्भः a kind of bird. 9 भूरिवर्चस् spirited (qualifies पितुः, कर्तरि षष्ठी). 11 निर + अस् cl. 4th, to turn out. 12 समनुजम् to take after; imitate. 13 ग्रह् to accept, do, जनस्य, अखिलस्य प्रजाजनस्य. 14 कर्मण्य, doing noble acts. 15 तीक्ष्णम्, a severe term.

XIII. 1 अनुयात्रम् an escort, a following. प्रति-वि-धा, to prepare. 2 उप-रुध्, to disinherit. 5 वन्यम् (adj. used as a noun), the forest produce. 13 आयस्त, distressed. 14 नित्य, constantly attached to. 16 अतिप्रवृत्त, licentious, wanton. 17 प्रकृत, present. i. e. left unoccupied by his departure. दारसंग्रहवर्तिन्, a house-holder. 18 अथ, if. प्रतिकर्मन्, attention to one's persou, i. e., toilet, decoration &c.

XIV. 8 समग्र, safe and sound सार्धत्रयं शतं यासां ताः 350. 9 समुपजानीत, notice it graciously, i. e. forgive it. 10 उपसंगृह्य governs पादौ (understood). दक्षिणं (पार्श्वं) प्रगतः, प्रदक्षिणः kept on the right. 11 अन्वक्षम् in one's presence, i. e. just after (see समासमयूख page 15). 12 दशरथं, मां and अयोध्यां are factitive objects. 13 संमत, favourite.

XV. 4 एकचित्तगतम्, going unanimously. 6 चक्रयोः etc. caught in a fix, like a person who, standing between two contending hosts is applied to for help by either party and is *sure* to incure the displeasure,—of both, if he keeps aloof, and of one if he joins iu the struggle. 8 The king's servants, not being masters of themselves, returned, after turning round R. in their minds; while the crowd of citizens running with great speed, did not return. Construe the stanza as:—राज्ञो जनः रामं मनसा प्रदक्षिणं कृत्वा, न्यवर्तत; (शेषं) मानुषं, आशुवेगेन उपलक्षितं न न्यवर्तत. अपि is an expletive.

XVI. 6 प्रेत्यफलोदये, प्रेत्य (after going away i. e. in the next world) फलोदयो यस्य सः, yielding fruit in the next world.

XVII. 3 ओजसा. तपस्तेजसा. प्रकम्पम् प्रबद्धः कम्पः येन तत् 4 याचनां प्रतिवेदिताः being informed of our request. 6 घृणाचक्षुः, घृणा चक्षुर्यस्य सः, led by sympathy. 7 निभृत, gentle, modest. 8 उद्धत impeded 10 निवर्तने = निवर्तनार्थम्. 12 निशामयति, to see. पुण्यलक्षण bearing auspicious marks on his person; this adj. seems to be used simply for alliteration. 13 लघु adv. quickly. (as it expresses in कानडी). 14 परिच्छदः necessary articles. आकुल,

thick. 17 आलोकः, a glimpse, trace. 19 यथागतः आगतमनतिक्रान्तः not being a stranger to the coming. i. e. the same they had come by. 22 सुतैः governed by समः (understood) and अधिक governs तेभ्यः understood.

XVIII. यात्वा, having traversed, 2 दैवतानि (acc.) object of आपृच्छे. 3 निवृत्तवनवासः (राजदन्तादि comp.) (see स. म. page 116), वनवासात् निवृत्तः 4 त्रिपथेन गच्छति सा 5 सागरतेजसा सागरस्य (सगरकुलजस्य भगीरथस्य) तपसा, 6 प्रति near. 8 हि inserted against good taste, only to avoid the combinaction of the adjoining vowels.

XIX. 4 पुनः पुनः repeatedly, प्रत्यनन्तरः a personal attendant.

XX. 1 तद्गतः तं गतः, concerning it.

XXI 1 विनियुक्तेन–रामप्रव्राजने विशेषेण नियोगं प्रापितेन. पापाभिजनभावया– पापकुलजया पापदेशजया पापाभिप्रायया च, अभिजनः–कुलम्, जन्मभूमिः. समर्थितम्–विचारितम्. 4 यद्यद्यापि ममैवाज्ञा– यावद्भरतागमनं दत्तेऽपि राज्ये ममाज्ञा प्रवर्तत इति भावः. निवर्तयतु– भवानित्यध्याहारः. 9 श्वसितोर्मिमहावर्तः– श्वसितरूपः ऊर्मियुक्तो महावर्तो यस्य सः. 10 प्रकीर्णकेशशैवालः– शोचितॄणां प्रकीर्णकेशा एव शैवालं यस्य सः. 11 वरवेलः– वर एव वेला मर्यादा यस्य सः. रामप्रव्राजना यतः–परमार्थसागरात्कालकूटमिव यस्माच्छोकसागराद्र मप्रव्राजना जाता.

XXII 1 सज्जमानया– विक्लवया. 7 विकम्पते– म्लानतां याति, lit. विचलति=स्वाभाविकप्रभां जहाति. वदान्यायाः– वल्गुवाचः. 9 उत्कृष्ट– तिरस्कृत. खेलम्– विलासयुतम्, सलीलम्. 10 आहारयति– संप्राप्नोति.

XXIII 3 सूपदंशान्वितम्– शोभनव्यञ्जनसहितम्. नैवारम्– नीवारसंबन्धिनम्. 6 फलति– विशीर्यते. 8 ज्येष्ठो वयसा वरिष्ठश्च गुणैः 9 परलीढम्– परास्वादितम्. 10 बालधेः– पुच्छस्य. 11 जलजेन– मत्स्येन. 16 विमृशमानानाम्– विमृशन्तीनाम्. 17 परा-

वरौ– उत्कर्षापकर्षौ. – 18प्रणाली– प्रासादादौ जलनिर्गममार्गः. नवोदकम्– वर्षजलम्. 24 आपतितः–हठात्प्राप्तः.

XXIV 6 अप्रतिकर्मणः – प्रतिक्रियारहितस्य. संयुक्तान् – इन्द्रियसंयुक्तान्. 9 संरक्ताः– भस्मतां प्राप्ताः. 10 संसाधयति–नाशयति.

XXV 2 शान्तगुणे– उपशान्तजीवनधर्मे. शान्तदेहोष्णस्पन्दनादिगुणे. 3 स्फीतीकृतः– वर्धितः. 5 दिष्टान्तमीयुषः– कालधर्ममुपेयुषः. 7 उपगृह्य– अङ्के कृत्वा. 8 एकाग्रा– पुत्रराज्यैकाग्रचित्ता. 10 नेत्रप्रस्रवणैः– नेत्राणां प्रस्रवणमश्रुप्रवाहो येषु तैः. 15 यथापुरम्– यथापूर्वम्. 16 निवृत्तचारः– निवृत्तकिरणप्रचारः. प्रवृत्तचारा– प्रवृत्ततमःप्रचारा. 18 आकण्ठास्रकण्ठाकुलमार्गचत्वरा– आकण्ठं धारारूपेण प्रवहद्भिरस्रैरुपलक्षिताः कण्ठा येषां तैराकुला मार्गाश्चत्वराश्च यस्यां सा.

XXVI 7 अमज्जयत्– अस्मानिति शेषः. प्रवारयति– बहूनि आभरणादीनि दिव्यवस्तून्युपस्थाप्य 'अङ्ग एषु किं तेऽपेक्षितं गृहाणे'ति प्रकर्षेणास्मदिष्टं वरणं कारयति भवान्.

XXVII 5 हतस्य– त्वयापारदुःखं प्रापितस्य. 7 स्मेति लोकोक्तौ. 12 पुत्रगर्धिनीम्– पुत्रराज्याभिलाषवतीम्. 13 विकाङ्क्षा– इच्छाभावः. 16 रज्जुं बद्ध्वा वा कण्ठे म्रियस्वेति शेषः. अन्यत्परायणम्– गत्यन्तरम्.

XXVIII 3 खमिवोद्विद्धैः– खस्य वेधकैः, अभ्रंलिहाग्रैः. 5 जलप्रपातैः– उच्चप्रदेशात्पतद्भिर्जलप्रवाहैः. उद्भेदैः– भुवमुद्भिद्य निर्गतैः. निष्पन्दैः– अल्पनिर्झरैः. 8 शरदः– संवत्सरान्. इत्यर्थः 16 पोप्लूयमानान्– पुनः पुनः प्लवमानान्.

XXIX 1 उपयायिनः– रामसमीप आगच्छतः.

XXX 14 लज्जया गात्राणि प्रविवेशेव– अत्यन्तसंकुचितोऽभूत्.

XXXI 6 यथादिष्टैः– यथाविहितैः ऋत्विक्क्लेशसाध्यैः

XXXII 10 साध्वर्थमभिसंधाय– राजोक्तार्थेषु कतमस्य साधुत्वमिति विचार्य. प्रत्याहरतु– निवर्तयतु. 19 आक्रोशम्–निन्दाम्.

XXXIII 7 त्यक्तुं न्याय्यमरिंदम Cf. न्याय्या मया मोचयितुं भवत्त (र० II. 55) 12 वर्षत्रम्– छत्त्रम्.

XXXIV 12 पितृदैवत्यम्– श्राद्धकर्म. प्रसृतः– प्रवृत्तः. उपद्रवम्– नाशम्. अष्टका (Originally)–अश्नन्ति पितरोऽस्यां तिथौ. (Secondarily)– Worship of manes on certain days. 14 दानसंवननाः– दानाय वशीकरणोपायभूताः.

XXXV 4 लोकसंकरम्– लोकसंकरकारकम्. 14 अकुहः– अकृत्रिमः अकपटशीलः.

XXXVI 2 कालीम्– कृष्णपक्षसंबन्धिनीम्. 6 प्रभाकराद्यैः– पद्मरागाद्यैः. 9 संमूढनिगमाम्– संमूढाः शोकाकुलचित्ताः निगमाः वणिजो यस्यां ताम्, यद्वा जनसंचाररहितमार्गाम्. संक्षिप्तविपणापणाम्– संकुचितविक्रयां संकुचितनिषद्यां च. 10 पानोत्तमम्– मधूत्तमम्. हतशौण्डाम्– हतमद्यपाम्. 19 अर्जुनी– शारदी शुक्लपक्षसंबन्धिनी वा. सासारा– वेगवद्वृष्टिधारासहिता. 23 उत्कुष्टम्– कृतशोकम्. विविक्तं शून्यम् .

XXXVII 5 वनेऽवरुद्धम्– वनवासे पित्रा नियुक्तम् 6 कामवक्तव्यहृदयाः– कामाधीनहृदयाः 'गृह्याधीनौ तु वक्तव्यौ' इति कोशः. भर्तृनाथाः– भर्तॄणां नाथभूताः भर्तृनियामिकाः. चरन्ति– स्वेच्छया इतस्ततो यान्ति. 12 समयः– आचारः. 15 Construe अद्वैधं यथा न भवति तथा वर्तितव्यम्. 21 हर्षयन्त्युत– हर्षयन्त्यपि, 'उताप्यर्थविकल्पयोः'. 22 छन्दये– वरं वृणीष्वेति प्रार्थये. 24 असंक्लिष्टम्–उपभोगेऽप्यशुचित्वमृदितत्वादिदोषरहितम्, अबाधितशोभम्.